कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

उ॰त्रि॰
१

श्रीकृष्णायवासुदेवायगोविंदायनमोनमः॥ ॥कृष्णायवासुदेवायहरयेपरमात्मने।प्रणतक्लेशनाशायगोविंदायनमोनमः॥ ॥
वह्नित्वावच्छिन्नस्यसर्वस्यैवधूमादिमन्निष्ठाभावप्रतियोगितावच्छेदकत्वेतत्तद्वह्नित्वावच्छिन्नत्वादौअव्याप्तिरित्यन्यथाव्याचष्टेप्र
तियोगितानवच्छेदकोयोधर्मस्तेनतथाचप्रतियोगितावच्छेदकेऽस्यभावप्रधानतयानिर्देशःअवच्छिन्नत्वंयस्यअवच्छिन्नप्र
तियोगिताकपरतयातादृशप्रतियोगितावच्छेदकत्वावच्छिन्नप्रतियोगिताकाभिन्नत्वंलभ्यतइतितावच्छिन्नपदवैयर्थ्यमितिध्ये
यंनचपर्वतेमहानसीयवह्निर्नास्तीत्यादिप्रतीतिसिद्धस्यहेतुमन्निष्ठाभावस्यप्रतियोगितावच्छेदकमेववह्नित्वमित्यव्याप्ति
तादवस्थ्यंसाध्यतावच्छेदकतदितरोभयावच्छिन्नभिन्नायाएवप्रतियोगितायाअवच्छेदकत्वस्यविवक्षितत्वान्नचप्रमेयसाध्य
तावच्छेदकस्थलेनतदितराप्रसिद्धिरितिवाच्यंयेनरूपेणसाध्यतावच्छेदकत्वंतदवच्छिन्नप्रकारतावच्छेदकस्यतदितरपदेनवि
वक्षितत्वात् यत्तुसाध्यतावच्छेदकस्यतदितरोभयानवच्छिन्नप्रतियोगितायाःनिवेशस्यप्यतदवच्छेदकांतर्भावोव्यर्थइतित
त्तुच्छंतत्तद्व्यक्तित्वावच्छिन्नाभावमादायवह्निमान्धूमादित्यादावपिव्याप्तेःतादृशाभावप्रतियोगितायाःसाध्यतावच्छेदक
तदितरोभयानवच्छेद्यत्वात् साध्यतावच्छेदकभिन्नोयःसाध्यनिष्ठःधर्मस्तदनवच्छेद्यत्वात्प्रतियोगितानानप्रवेशस्यात्तथासति
तादृशप्रतियोगितानन्यसाध्यसामानाधिकरण्यस्यैवव्याप्तित्वसंभवेसाध्यतावच्छेदकस्यतदनवच्छेदकत्वानुसरणवैय्य
र्थ्यापत्तेःप्रथमपक्षेतुउभयाभावमादायदोषवारणायतत्सार्थकत्वात्अपिचप्रमेयान्यत्वादिसाध्यकव्याप्तिःसा

राम॰
१

(1)

Acc. No. 413 M825
Title - प्रतियोगिता व्याधिकरण लक्षण टिप्पणी
Subject - न्याय
Author - ?
Pages - 56p.

KKSU LIBRARY
RAMTEK
441 106
M-825
Dist Nagpur

Checked 2012

ध्यतावच्छेदकातिरिक्तं यत्साध्यवृत्ति घटत्वादिकं तदनवच्छिन्नप्रतियोगिताकस्य हेतुसमानाधिकरणाभावस्याप्रसिद्धेरिति तु न वाच्यं वह्निमा
न्धूमादित्यादौ धूमनिष्ठस्य तत्तद्व्यक्तित्वावच्छिन्नसामानाधिकरण्यस्य वह्निसामान्यनिरूपितत्वाभावादाह तद्धर्मावच्छिन्नेनेति द्रव्यत्वा
दिप्रकारणधूमादेः वह्निव्याप्यस्य धूमसामान्यवत्तत्तद्वह्निव्याप्यत्वस्य वारणार्थं विशिष्टलक्षणं निर्दिशति तेन रूपविशिष्टस्येत्यादि
नाव्याप्तिरिति तद्धर्मावच्छिन्नहेतुकतादृशधर्मावच्छिन्नसाध्यकानुमितिजनकतायां विषयविधयावच्छेदक इति तदर्थः तेन व्याप्तिपद
नापि तादृशसामानाधिकरण्योपस्थाने पौनरुक्त्यं महानसीयवह्निसामानाधिकरण्यस्यैव निखिलधूमवन्ह्यादिव्याप्तिमित्यव्या
प्यसामान्यरूपतालाभाय यावदिति येन केनापीति च न तु दण्डिमान् दण्डसंयोगादित्यत्राव्याप्तिः चालनीन्यायेन दण्डमात्रस्यैव हेतु
मन्निष्ठाभावप्रतियोगितावच्छेदकत्वान्न च तन्तुरूपसाध्यतावच्छेदकस्थले प्रतियोगितावच्छेदकमित्यत्रावच्छेदकत्वं निरवच्छिन्नत्व
मेव विशिष्टसाध्यतावच्छेदकस्थले येन रूपेण साध्यतावच्छेदकत्वं तत्त्वदितरोभयानवच्छिन्नप्रतियोगितावच्छेदकत्वमेव ग्राह्यं अ
न्यथा महानसपर्वतीयवह्निवृत्तित्वविशिष्टजातिमान्नास्तीत्यादिप्रतीत्या विशिष्टवह्नित्वस्य तादृशाभावप्रतियोगितावच्छेदक
तया वह्निमान्धूमादित्यादावव्याप्तिः एवं जातिमत्वान्यगमत्वादित्यादावव्याप्तिप्रसंगात् घटपटसमवेतत्वविशिष्टजातिमा
न्नास्तीत्यादिविशिष्टजातेः तादृशप्रतियोगितावच्छेदकत्वात् तथा च तद्दण्डवान्नास्तीत्यादिप्रतीत्या तन्नाविशिष्टदण्डव्यक्तेरेवाव
च्छेदकत्वावगाहनात् शुद्धदण्डव्यक्तीनामवच्छेदकत्वमेवेति वाच्यं प्रमेयदण्डवान्नास्तीत्यादौ प्रमेयत्वोपलक्षितस्यैव तद्दण्डना

2

आन्वि०
२

नास्तीत्यादावपि न चोपलक्षितदंडव्यक्तिमात्रस्यैवावच्छेदकल्पनात् केवलस्यावच्छेदकत्वासंभव एव विशिष्टस्यावच्छेदकत्वस्वीकारा
त्स्यान्यथाप्रमेयत्वविशिष्टदंडादेरपि तथात्वापत्तेरत आह दंड्यादाविति हेतुमति दंडसामान्याभावसत्त्वात् दंडवत्त्वमपि नाहत्राप्रतियोगि
तावच्छेदकत्वमेव यत्र उक्तं परंपरासंबंधमिति तथा च स्वाश्रयवत्तात्मकपरंपरासंबंधेन दंडवत्त्वतो दंडिनः साधनवत्त्वनावकिरहान्न
व्याप्तिः साध्यतावच्छेदकघटकसंबंधावच्छिन्नाया एव हेतुमन्निष्ठाभावप्रतियोगितायाः प्रविष्टत्वादन्यथा विपरीतयारूपत्वादिमतः
समवायेनाभावस्य हेतुमति सत्त्वाद्रूपवान्पृथिवीत्वादित्यत्राव्याप्तिप्रसंगादिति भावः यस्त्विचमुद्दंडव्यक्तेरवच्छेदकत्वावगाहि
प्रत्ययांतरसत्त्वात् दंडीनास्तीत्याप्रतीत्यानन्नाविशिष्टदंडव्यक्तेरेवावच्छेदकत्वं युक्तं दंडी नास्तीति प्रतीत्यन्यथानुपपत्त्या दंडस्या
वच्छेदकत्वसिद्धेः प्रमेयदंडवान्नास्तीत्यादेरपि तन्मात्रावच्छेदकतयैव सामंजस्ये विशिष्टस्य तत्रावच्छेदकत्वकल्पनात् तथा कथ
मुक्ताव्याप्तिरिष्यते तदा रूपत्वन्यूनवृत्तिजातिमत्त्वात् रूपादित्यादावव्याप्तिः सर्वासामेव नीलत्वपीतत्वादीनां रूपत्वन्यूनवृ
त्तिजातीनां साधनवन्निष्ठाभावप्रतियोगितायां निरवच्छिन्नावच्छेदकत्वाद्रूपवति नीलो नास्तीत्यादिप्रत्ययादित्याशयेन वह्या
दावित्यादिप्रत्ययादि ~~ससमान~~वस्तुपातेन तथा च तत्रापि स्वन्यूनवृत्तिजात्याश्रयत्वसंबंधेन रूपत्वमेव साध्यतावच्छेदकमिति
भावः साध्यतावच्छेदकमिति अनुमितिविधेयतावच्छेदकमित्यर्थः तथा चोक्तव्याप्तेर्ज्ञानाद् दंडपरो दंडत्वप्रकारिका दंडत्ववत्तानियो
घानुमितिः ननु दंडप्रकारिकापि तस्य व्यापकतावच्छेदकत्वेनाग्राहात् कारणवादेन तदसंभवादिति भावः वस्तुतः दंडत्व

राम०
२

3

स्य साध्यतावच्छेदकत्वे दंडीमानित्यनुमितिर्न स्यात् दंडानां व्यापकतावच्छेदकत्वाभावादित्यस्वरसादेव दंडत्वादिकमित्यत्रादिपद
मुपात्तं तेन दंडव्यक्तीनामेव स्वत्वन्निदंडत्वजात्याश्रयाधिकरणत्वलक्षणपरंपरासंबंधेन साध्यतावच्छेदकत्वे नानादंडि
मान् नित्यनुमितेर्नानुपपत्तिरिति तत्त्वं केचित्तु साध्यसाधनभेदेन व्याप्तिग्रहानुमित्योः कार्यकारणभावभेदा यत्र दंडत्वादि
विशिष्टं साध्यतावच्छेदकं तत्र हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकतानवच्छेदको यो धर्मः तद्विशिष्टावच्छिन्नसामानाधिक
रण्यरूपैव व्याप्तिस्तद्विशिष्टावच्छिन्नविधेयकानुमितिप्रयोजिका यत्र च परंपरया दंडत्वादिकमेव अनुमितिविधेयतावच्छेदकं
तत्र हेतुमन्निष्ठाभावप्रतियोगितावच्छेदको यो धर्मः परंपरया तदवच्छिन्नसामानाधिकरण्यरूपैव व्याप्तिरनुमितिप्रयोजिके
तिसामानाधिकरण्यांशे विशिष्टदंडादेः प्रवेशाप्रवेशाभ्यां दंडिमान् दंडत्ववत्त्वादित्यनुमित्योः दंडादिविषयकत्वनियमरूपा
रूः यत्तु दंडत्वधर्मकनिरूपितानवच्छेदकत्वसामानस्यैव कार्यतावच्छेदकदंडत्वावच्छिन्नविषयकानुमितित्वमित्यनुमितेः
दंडप्रकारकत्वं नानुपपन्नमिति तन्नुच्छं परंपरया दंडत्वावच्छिन्नविधेयकानुमितित्वस्यापि तादृशसाधनकार्यतावच्छेदकतया सर्व
त्र दंडिमान् दंडत्ववत्त्वानित्यत्र यथाकारणानुमित्सापत्ते तन्नय धर्मावच्छिन्नस्यैव सामग्रीसंभवादिति दिक् यद्रूपविशिष्टे यस्य फल
माहात्म्यं चेति चोऽवधारणे इत्यादौ दूषयति न्यायस्थलीयानुमितौ तथा च न्यायः पक्षनिर्देशेन संभवतीत्यतः इदंपदेन तन्नि
र्देशः एवमग्रेपि यत्तु द्रव्ये धर्मिणि तादात्म्येन गुणकर्मणोः साध्यताभ्रमस्यानिरासादिति गुणादावृत्तेरिति गुणाद्यभावा

4

सि॰ला॰
३

वादित्यर्थः तथा च हेतुतावच्छेदकावच्छिन्नानधिकरणत्वं न गुणस्येति भावः। यद्यप्यवह्न्यालोकमणिभिः पर्वतस्तत्त्ववत्त्वादित्यत्र धूम
विशिष्टतत्तद्धूमत्वाद्यवच्छिन्नानधिकरणतया व्यक्तिभिरेव धूमवदिति प्रत्ययुपपत्तौ धूमत्वाद्यवच्छिन्नानधिकरणतायां मा
नाभावाद्वह्निमान् धूमादित्यादौ अव्याप्तिः हेतुतावच्छेदकीभूत धूमत्वाद्यवच्छिन्नानधिकरणत्वाप्रसिद्धेः तथापि हेतुता
वच्छेदकधर्मे यन्निष्ठाधिकरणतानवच्छेदकत्वं स्वाधिकरणतावच्छेदकत्वस्य च द्वयोर्व्यतिरेकः तथाविधहेतुतावच्छेदका
श्रयस्याधिकरणमेव हेतुतावच्छेदकाधिकरणपदेन विवक्षितं वह्निमान् धूमादित्यादौ च तादृशं हेत्वधिकरणं धूमस्यादि
धिकरणमात्रं द्रव्यं विशिष्टसत्त्वादित्यादौ तादृशहेत्वधिकरणं द्रव्यमेव न गुणादि विशिष्टसत्त्वे तन्निष्ठाधिकरणतानवच्छे
दकत्वस्याधिकरणतावच्छेदकत्वस्य च द्वयोः सत्त्वादिति ध्येयम्। साधनत्वेदेन व्याप्तेर्भेदात् यत्र हेतुतावच्छेदकं अधिकरण
तानवच्छेदकं तत्र तदाश्रयसमानाधिकरणत्वमेव निवेश्यमित्यपि वदंति ननु सामानाधिकरण्यस्य व्याप्तित्वे तस्य
प्रतिधूमं भिन्नत्वात् धूमसामान्यवह्निसामान्ययोरेका व्याप्तिरिति व्यवहारोऽनुपपन्न इत्यत आह सामानाधिकर
ण्यमिति। तथा च वह्नित्वधूमत्वाद्यनुगमादेव तत्र व्याप्तेरैक्यव्यवहारो न तु वस्तुगत्या व्याप्तेरैक्यमिति भावः। नन्वेवं महान
सीयवह्निसामानाधिकरण्यस्य स्मृतस्य पक्षवृत्तिधूमादावसत्त्वात् पर्वतीयवह्निसामानाधिकरण्यस्य प्रागनुमनवा
त्कुतः परामर्शः इत्याशंकायामैकैव वह्निसाव्याप्तिरिति परामर्शोऽपि सिद्धान्तग्रंथः। असंगत इत्यत आह वस्तुतस्त्विति। सामन्ये

राम॰
३

वीतितथाचधूमव्यापकवह्निसामानाधिकरण्याश्रयत्ववान्पर्वतइतिज्ञानादप्यनुमितिस्यादितिभावः।नचधूमादिव्या
पकवह्निसमानाधिकरणधूमादिनिश्चयत्वेनैवपरामर्शीयधर्मलिंगकानुमितिहेतुत्वादुक्तव्याप्तेःआसन्नादिसाधार
ण्येपिनक्षतिरितिवाच्यं।पक्षधर्मतांशेविषयितयानुमितिजनकतावच्छेदकस्यैवव्याप्तिपदार्थतयाधूमत्वादेस्तत्रानि
वेशात्तदघटितस्यैवव्याप्तित्वादितिभावः।धूमत्वादिमतीतितथाचतस्यतिसृलास्छुतसदेलक्षेलक्षणेचोक्तयत्राश्रित
मितिभावः।ननुसाध्यतन्निष्ठसामानाधिकरण्यस्यव्याप्तित्वेविशिष्टसत्त्वव्यापकीभूतत्वाऽद्द्रव्यत्वसमानाधिकरण्य
वतःसत्त्वस्यगुणादौपरामर्शात्गुणेपिद्रव्यत्वानुमितिप्रमास्यादतआहतद्वृत्तीतितादृशसामानाधिकरण्यवतीत्य
र्थः।तथाचतादृशसामानाधिकरण्यविशिष्टधूमत्वंव्याप्तिः।तत्प्रकारिकैवपक्षधर्मताधीरनुमितिहेतुः।तत्रचनी
लघटत्वप्रकारकबुद्धौघटत्वस्यैवस्वरूपतएवधूमत्वस्यज्ञानंनतुधूमत्वत्वेनयतोगौरवमितिभावः।आद्येतितथा
चेतानुपादायैवपर्वतीयवह्निधूमयोरसंनिकृष्टयोः।कथंव्याप्तिग्रहइतिपरामर्शीयपूर्वपक्षइतिभावः।द्वितीयेति।
तथाचैतामपिप्रत्येवएकैवहिसाव्याप्तिरितिपरामर्शीयसिद्धांतइतिभावः।यत्रएकमेवसाध्यादिकरण्यंतत्रएतद्रूप
वान्एतद्रसादिस्यादौआद्याऽभिन्नमेवयत्रचद्रव्यत्वादौसाध्येतद्रूपत्वव्याप्यजातिमत्तोहेतुत्वंतत्रहेतुतावच्छेदकीभूतानी
लत्वादिजातीनांनानात्वेनद्वितीयपिकेचिद्भिन्नैवेतितुमन्तव्यं।कपिसंयोगिन्यतत्पदार्थस्यसाध्यत्वाभ्रमस्वैवन।

ऊा॰
४

र्थमयमिति पक्ष्य निर्देशः सांप्रदायिकमते संयोगसामान्याभावस्य द्रव्येऽसत्वात्कपीति। कपिसंयोगाभाव अस्ति वृक्षत्वेस्य
सत्वादिति। न चाभावे हेतुसामानाधिकरण्यस्यैव हेत्वधिकरणे निरवच्छिन्नवृत्तिकत्वस्य प्रवेशादुक्ताव्याप्तिर्दुरा
सस्तेन वानुप्रतियोगिवैयधिकरण्यप्रवेशो मूलकृतामनुचित इति वाच्यं अग्रे समाधास्यमानत्वादिति भावः
नत्। असमानाधीकरण्यात्वेन तत्राप्रसिद्धाही सर्वविषयतावच्छेदेन सर्वत्र द्रव्यगगनादिसंयोगस्य सत्वात्कुतस्तत्सामा
न्याभावस्य द्रव्ये संभव इत्यत आह संयोगस्येति वृक्षशाखाद्यवच्छेदेन तत्तत्संयोगसत्वेपि वृक्षत्वावच्छेदेन कस्या।
पि संयोगव्यक्तेरसत्वात्तदवच्छेदेनैव संयोगसामान्याभावसंभवः अवच्छेदकभेदेनैकत्र भावाभावयोः समावेशादिति
भावः। नन्वेवं वृक्षसंयोगसामान्याभावस्य कुतो नासाध्यत्वमत आह तत्र चेति। तत्र संयोगसामान्याभावे सत्वादि
यस्य प्रतियोगितासंबंधेन सत्वादिः। तथा च संयोगसामान्याभावस्य योग्यत्वात्साध्यत्वमिति भावः। ननु प्रतियोगि
तावच्छेदकविशिष्टस्यैव यस्य कस्यचित्प्रतियोगिनः योग्यत्वमस्त्येतेनाभावग्रहे नेत्रेन नतु योग्यमात्रप्रतियोगिकत्वं अन्य
था। गुणे संयोगसामान्याभावस्य प्रत्यक्षं न स्यादत आह। परिचित इति। परितः सर्वविषयतावच्छेदेन प्रतियोगिग्रहजन
कदोषाद् इत्यर्थः। न चैवं प्रतियोगिनोऽग्रहदशायां तत्प्रत्यक्षं दुर्वारमिति वाच्यं प्रतियोग्युपलंभकसामग्र्या अपि
दोषत्वोपगमात् प्रतियोगिनमुपलभ्यियत इति व्युत्पत्त्या तस्या एव वक्तव्यत्वादिति भावः। न चेति माणं इति पर

राम॰
४

णान्वयः यो यदीयेति यो यज्जातिसमानाधिकरण्योन्नयद्वृत्तिधर्मावच्छिन्नयत्संबंधावच्छिन्नप्रतियोगिताकया
तदभाववान् स तज्जात्यवच्छिन्नतत्संबंधावच्छिन्नप्रतियोगिताकाभाववानित्यर्थः तेन न स्वरूपासिद्धिः सिद्ध
साधनत्वं वाऽस्फपादान्गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नाभावस्याप्रसिद्ध्या न व्यभिचारः योय
द्धर्मन्यूनवृत्तिधर्मावच्छिन्नयावदभाववान् सः तद्धर्मावच्छिन्नाभाववान् इत्यर्थस्तेन संयोगत्वेन्यूनवृत्तिधर्मावच्छि
न्नप्रतियोगिताकस्य घटगवृत्तिसंयोगवृक्षान्यासमवेतत्वावच्छिन्नाभावस्य वृक्षादौ स्वरूपासिद्धत्वात् अनुपा
देयः। संयोगत्वावच्छिन्नाभाववृत्तित्वसंसर्गावच्छेदेन वृक्षादौ गगनादेरेक एव संयोगो ऽतो घटादिनिष्ठस्य वा
भावविरहात् संयोगत्वावच्छिन्नाभावत्वं वृक्षे स्वरूपासिद्धमिति वाच्यं अतिप्रसंगभंगाय रूपादितन्नदवयवा
वच्छिन्नवृत्तिकेपि संयोगप्रभिन्नतदवयवे हेतुत्वस्यावच्छेदकतयो वृक्षस्याव्याप्यवृत्तिगगनसंयोगस्यासत्त्वादिति भावः
प्राचीनमते यत्तदर्थयोरनुगमाद्याह एकावच्छेदेनेतीदमुपाधेः साधनाव्यापकत्वरक्षायै न चैवं तत्संयोगाभा
वस्य गुणेऽव्याप्यवृत्तित्वादेकावच्छिन्नत्वेन साध्यव्यापकत्वं दुर्घटमिति वाच्यं एकावच्छेदेनेत्यनेनानवच्छिन्नवृत्तिक
त्वविशिष्ट इत्यस्य विवक्षितत्वात् न च तथापि कपिसंयोगादिसामान्याभाववति वृक्षे निरवच्छिन्नवृत्तिकत्ववि
शिष्टस्य तदीयत्वावच्छिन्नाभावाभावस्यासत्त्वादुपाधेः साध्याव्यापकत्वमिति वाच्यं जात्यावच्छिन्नाभावस्यैवात्कया

त्रिं०जा०
५

स्येऽसाध्यविधयाप्रवेशात्कपिसंयोगाभावस्य चानवच्छिन्नत्वेन तं प्रतीतदीययावद्विशेषाभावस्योक्तरूपोपाव्यापकत्वेपि क्षय
भावात् न चाभिघातसामान्याभावस्य वृक्षे सत्वात्तन्नच निरवच्छिन्नवृत्तिकत्वविशिष्टस्य तदीययावद्विशेषाभावस्यासत्वा
देवमप्युपाधेः साध्याव्यापकत्वमिति वाच्यं गुणविभाजकजातेरेव हेतुसाध्ययोः प्रवेशात् यत्तु एकावच्छेदेनेत्यस्य परस्प
रानवच्छेदकानवच्छिन्नवृत्तिकत्वविशिष्टेत्यर्थ इत्याहुः तच्चिंत्यं । व्याप्यवृत्तीलरूपादीनां विशेषाभावस्यावच्छेदकाप्रसि
द्ध्यात् तदनवच्छेदकस्याप्यसंभवेन तत्रैव साध्यव्यापकत्वतादवस्थ्यादिति भावः यत्तु प्राचीनाकृतमनुगतानुमानमात्रा
क्यमिति निषेधयति एतेनेति वक्ष्यमाणदोषेणेत्यर्थः व्यर्थेति संयोगसामान्याभावस्य त्वन्मते केवलान्वयितया तत्सा
ध्यतायामभाववत्त्वादित्यस्यैव सम्यक्त्वादिति भावः अथात्यन्ताभाववत्त्वादिकमेव तर्हि हेतुरस्त्वत आह । अप्रयोजक
त्वादिति ननु निरुपाधित्वमेव प्रयोजकमत आह । निर्गुणत्वादेरिति । आदिना द्रव्यभिन्नत्वादेरुपग्रहः यत्र य
द्यपि निर्गुणत्वोपाधेर्न स्वभावेन साध्याभावोन्नायकतया दूषकत्वं संयोगस्यैव साध्याभाववत्तया वृक्षादौ तस्य
दृष्टत्वात् न पि व्यभिचारोन्नायकतया तत एवं तथापि स्वव्याप्यत्वेन साध्यस्य पक्षावृत्तित्वोन्नायकतया दूषकत्वं बोध्यं
संयोगसामान्याभाववत्त्वानिष्टानुमितेः प्रतिबंधादिति ध्येयं ननु यो यद्धर्मस्यानवच्छेदकः स तन्न तदभावावच्छेदक
इतिन्यायस्यैव वृक्षत्वादेः संयोगसामान्याभावावच्छेदकत्वे यस्य तीसामान्यकथनं चेमित्यादिना निराचष्टे नयाच्च व्यभि

राम०
५

चारान्नोक्तव्याप्तिरिति भावः ननु वृक्षत्वं संयोगसामान्याभावावच्छेदकसंयोगसामान्यानवच्छेदकत्वादिति विशिष्टैव
व्याप्तिर्ध्येयो वाच्या प्रमेयत्वादेः पक्षसमत्वादतः स्वरूपसिद्धिमाह। अथ चेति। प्रतीदंडमिति। भिन्नत्वेपीति
परेणान्वयः नन्वव्यवहितपूर्ववृत्तितायाः नावच्छेदकं दंडत्वमतिप्रसंगात् किंत्वव्यवहितपूर्ववृत्तीजातीतायाः सा
चमिनेसतः संगतस्थलएवानुमपदृष्टांतमाहावह्निनीतसामान्यति। घटपूर्ववृत्तित्वसामान्यस्यैव वह्निं कुतो वृक्षत्वा
देः न साध्यते वृक्षत्वावच्छेदेन तत्तत्संयोगव्यक्तीनामसत्वेपि संयोगसामान्यस्य सत्वेन वादित्यपि प्रायकोऽयंग्रं
थद्वयाहुः गुणस्येति सामान्याभाववृत्तिपरेणान्वयः नन्वाद्यक्षणे घटे गुणो नास्तीति प्रत्यक्षमसंभवसन्निकर्ष
र्षाद्यभावात् प्रथमक्षणे घटे गुणो नास्तीत्यादिस्वव्यवहारादिकं च संदिग्धप्रामाण्यकमतस्थानांतरमाह
प्रलयावच्छेदेनेति इदानीं जन्यभावसत्वे प्रलय एव व्याहन्येनेति भावः ननु महाप्रलये मानाभावात्तदवच्छे
देनेत्यत्र उक्तमत आह तथेति। ननु प्रतीतिपर्वतवृत्तिहुताशनावच्छेदकत्वाभाव त्रिःस्वरेति। त्रिःस्वरावच्छिन्नपर्वतवृत्ति
त्वाभावं वा हुताशने अवगाहते न तु पर्वत एव हुताशनाभामिति यदि ब्रूयात्तदाप्याह संयोगेनेति तथा च यो यद
वच्छेदेन यत्संबंधाभाववान् तदवच्छेदेन तत्संबंधाभावो वै रह इति व्याप्त्या त्रिःस्वरावच्छेदेन संयोगसंबंधावच्छिन्न
वन्ह्यभावासिद्धिरिति भावः ननु तत्र व्याप्तेः प्रयोजकत्वमन्यथा तुल्यन्यायेन यद्विय घसंबंधवान् सतत्संबंधेन

व्या०
६

तदानीतिव्याप्यापि कुण्डादिसंयोगिनो वदरादेः संयोगे कुण्डादिमत्त्वापत्तेरित्यत आह। एवमिति घटवत्यपि काले इदानीं तंतो
न घट इति प्रतीयात्तत्त्वावच्छेदेनैव तत्काले घटाभावः तथा घटवत्यपि कपाले घटनाशादृगायां इदानीमिह कपाले न घट
इत्यनुभवात् तत्कालावच्छेदेन कपाले घटस्य सामान्याभावः सिद्ध्यतीति चेदिदानीं नं तु पुन घट इत्यादि प्रतीतेरतत्कालाव
च्छिन्नत्वं तु पूर्वघटाभावो विषयोऽस्तु यत्तत्त्वावच्छेदेनैव तत्काले तथेति वाच्यं तं तु पु घटाभावस्याव्याप्यवृत्तितया एतत्कालस्या
वच्छेदकत्वावगाहनेनोक्तप्रतीतेः तत्र मत्त्वापादनं न च तथाप्येतत्कालवृत्तिघटाभाव एवं तं तु पुनासत्तां तत्रेति वाच्यं काल
स्य प्रतियोगिकुक्षाव ग्रहेऽपि नाद्यप्रतीत्या तत्त्वावच्छेदेन समयेन घटाभावगाहि सत्त्वस्यानुभाविकत्वादिति भावः। तथा
चेति गुणवत् संयोगद्रव्यत्वात् वह्निमान् धूमात् समयो घटवान् एतत्कालत्वात् कपालं घटवत् घटध्वंसादित्यादिकेऽव्या
प्तेर्वारणायेत्यर्थः। तदिति असमानाधिकरणानां तमित्यर्थः। नोपादेयं चेति येन रूपेण येन संबंधेन यद् व्याप्यवृत्ति तेन रू
पेण तेन संबंधेन तस्य साध्यतायां नोपादेयमित्यर्थः। तेन न द्रव्यसंयोगत्वेनाव्याप्यवृत्तेरपि संयोगस्य समवेतत्वेन साध्यतायां
कालिकतया अव्याप्यवृत्तेरपि द्रव्यत्वस्य समवायेन साध्यतायां न प्रविविति यामि व्यधिकरणपदमिति परं तु द्रव्यत्वादेः कालि
केन साध्यतायां तदुपादेयमेव अव्याप्यवृत्तिसाध्यके संयोगाभाववान् गुणत्वादित्यादौ केचिदेव न देयं व्याप्यवृत्तिसाध्य
के तु प्रयोजनविरहात् सर्वत्रैव न देयं इत्यावदन्ति तु सर्वथैव स्फुटं साध्यनेदेनेति। साध्यतावच्छेदकसंबंधोऽरस्युपलक्ष

राम०
६

कं यद्यपि व्याप्यवृत्तिसाध्यकस्थले तदप्रवेशे सत्तावान् ज्ञातेरित्यादावव्याप्तिः साधनवति स्पंदादौ समवायेन सत्ताभाव
स्यापि कालिकसंबंधेन वृत्तेः न चाभावे हेत्वधिकरणवृत्तित्वस्य विशेषणतया विवक्षितत्वान्नोक्तदोषस्तथा सत्यपि
द्रव्यत्वस्पन्यं सत्वादित्यादौ अतिव्याप्तेः द्रव्यत्वरूपसाध्याभावस्य विशेषणतया वृत्तिविरहात् द्रव्यभिन्नत्वप्रकारकप्रमा
विशेष्यत्वाभावस्यापि द्रव्यत्वानतिरेकात् न चाभावत्वप्रतीतेः प्रमाहरक्षणार्थं अभावाभावस्यातिरिक्ततयोक्ता
तिव्याप्त्यादिवारणमिति वाच्यं अभावत्वं चेत्यग्रिमग्रंथेन भावाभावसाधारणस्याभावत्वस्य निर्वचनविरोधापत्तेः
घटत्वाद्यभावस्य कालिकसंबंधावच्छिन्नाभावस्वरूपसंबंधेन साध्यगगनवादित्यादौ अव्याप्तेः तथाप्यनुद्भूत
त्वे विशेषणतया गगननिष्ठस्य घटत्वाभावस्यैव नोहत्राघटत्वाभावाभावत्वकल्पनात् तावतैवाभाववत्त्वप्रतीतेः
प्रमात्वसंभवात् अत एव साध्यताघटकसंबंधे साध्यवत्त्वबुद्धेः विषयविधया प्रतिबंधकतावच्छेदकीयः संबंधः
तेन संबंधेन हेतुसामानाधिकरण्यमभावस्य ग्राह्यमित्युक्तावपि न निस्तारः तथाविधसंबंधेन हेतुसामाना
धिकरण्याप्रसिद्ध्या निरुक्तगगनत्वादिहेतौ द्रव्यत्वाभाववञ्जातित्वादित्यादौ चाव्याप्तेः तथापि साध्यतावच्छे
दकसंबंधेन प्रतियोगित्वबुद्धेर्विषयतया प्रतिबंधकतानवच्छेदकीयः संबंधः तेन हेत्वधिकरणवृत्तित्वमभाव
स्याविवक्षितमित्यदोषः तथा च द्रव्यत्वाभाववञ्जातित्वादित्यादौ विशेषणताविशेषणाऽजातित्वान्नावबुद्धेर्विष

त्रि०ला०
७

यद्विधया प्रतिबंधतावच्छेदको यः स्वरूपसंबंधः तेन जातिरूपस्वरूपाभावस्य प्रसिद्धेरिति भावः। वक्ष्यते व्याप्यवृत्तित्वमंत्रसाध्यता
वच्छेदकसंबंधेन यत्स्वाधिकरणं न वृत्त्यभावस्य तादृशसंबंधावच्छिन्नप्रतियोगित्वाभावरूपं ग्रंथकृतोऽभिप्रेतं तादृशसाध्यं
च समवायादीनामात्मत्वादेः साध्यत्वे ज्ञानादिकं समवायेनात्मत्ववति समवायावच्छिन्नात्मत्वाभाववन्नापि संबंधेना
नावृत्तेस्तथा च तादृशसाध्यक एवानेनोपादेयं संभवात् जातेरित्यादेः पुनरुपादेयमेव समवायेन सत्त्ववति स्पंदादौ सम
वायावच्छिन्नसत्त्वाभावस्यापि कालिकसंबंधेन वर्तमानतया सत्त्वादेर्निरुक्तव्याप्यत्वाभावात् व्याप्यवृत्तिताघटकस्य
स्वाधिकरणावृत्तित्वस्य संबंधसामान्येन प्रविष्टत्वात् तल्लाभार्थमेव सर्वथैव व्याप्यवृत्तिनिरुक्तं तस्य संबंधाविशे
षाणि नियंत्रितत्वात् व्यभिचारादिरूपसंबंधो न वृत्तिनियामकत्वेनाभिमतादपि न व्याप्यवृत्तित्वहानिरिति ध्येयं एवं
धर्मावच्छिन्नप्रतियोगितायाः प्रतियोगिव्यक्तीनां भेदाप्येकभिन्नभिन्नैव्यमतेव वह्निमान् धूमादित्यादौ वन्ह्यादिसा
मान्याभावमादाय व्याप्तिसंभवादतिव्याप्तेर्वारणमेव प्रयोजनमाह। तेनेति। न च विशिष्टसत्त्वस्य व्याप्यवृत्तितया
तत्साध्यके प्रतियोगिवैयधिकरण्याप्रवेशादिदमयुक्तमिति वाच्यं जातौ विशिष्टसत्त्वस्य व्यभिचारज्ञानदशायाम
पि न विशिष्टसत्त्वधर्मकजातिमन्निष्ठप्रतियोगिव्यधिकरणाभावाप्रतियोगित्वज्ञानाद्विशिष्टसत्त्वसाध्यकानुमितिरिति
प्रसंगस्यैव प्रकृतेऽपि प्रसंगार्थपदार्थत्वात् विशिष्टसत्त्वस्याप्युक्तरीत्या व्याप्यवृत्तित्वविरहाच्च ननु। विशिष्टस्यापि

राम०

13

रिक्तत्वमतेन चेन्नातिव्याप्तिसंभवादित्यत आह नन्वेवेति । प्रोचक्त विशिष्टसत्वस्य व्याप्यवृत्तीतया न साध्यके प्रतियो
गिवैयधिकरण्याप्रवेशाद्दुन्तत्वे स्यादि साध्यांतरं तत्र चात्मत्वभिन्नत्वे सति विशेषगुणवत्त्वं तदुभयं चाव्याप्यवृत्त्येव घ
टावुत्पत्तिकालावच्छेदेन तदुभयाभावसत्त्वादित्याहुः न चेति वाच्यमित्यन्वयः तदप्यभावः सहजनतद्वृत्तिप्रतियोगिता
वच्छेदकावच्छिन्नत्वाप्रवेशापि यदर्थः न्यूननयत्वस्य विशिष्टत्वातिरिक्तत्वेपि सहजत्वः प्रतियोगिव्यधिकरणस्य
विशिष्टत्वावच्छिन्नाभावस्य प्रतियोगितावच्छेदकमेवोभयत्वमतो नातिव्याप्तिः विशिष्टाभावस्योभयत्वावच्छिन्नाभावा
नतिरेकादत आह नन्वेति तदवच्छिन्नाभावादिति । उभयत्वावच्छिन्नाभावादित्यर्थः लिंगव्याप्यासेन न अनतिरिक्तत्वस्य
नुपपत्त्यते तथा चातिरिक्तत्व एवेत्यर्थः न चान्यत्रोभयाभावस्य विशिष्टाभावातिरिक्तत्वेपि प्रकृते भूतत्वविशिष्टमू
र्तत्वाभावस्यैव तदुभयत्वावच्छिन्नप्रतियोगिताकत्वं समनियताभावयोलाघवादेकत्वादिति वाच्यं तावतापि हेतुम
त्तो याद्दशाप्रतियोगिताश्रयानधिकरणत्वेन ताद्दशाप्रतियोगितानवच्छेदकत्वस्य भूतत्वे भूर्तत्वोभयत्वेनऽपायानति
व्याप्तितादवस्थ्यादिति भावः उभयत्वस्येति प्रत्यक्षसिद्धत्वादिति परेणान्वयः विरुद्धयोरेव समानाधिकरणयो
रप्युभयत्वमिति पि अतिरिक्तत्वमेव विरुद्धद्वयच्छलीय प्रतीत्योः समानाकारत्वात् भूतत्वमूर्तत्वयो विरुद्धत्वाभावद

त्रि॰ सा॰
८

ग्रायांमप्युभयत्वस्य प्रत्ययाच्चेति भावः। न त्वनन्तत्वमूर्तत्वोभयवान् इत्यत्राव्याप्तिरेवेति न तथा च तस्य लक्ष्यतया वारणाप्रया
सोऽनुचित इति भावः। तथात्वेपीति। उभयत्वाश्रयीभूतमूर्तत्वस्य मनसि सत्वेपीत्यर्थः। तथा च हेतुतावच्छेदकावच्छिन्ने हेत्व
धिकरणावच्छेदेन साध्यतावच्छेदकावच्छिन्नवतास्थले एव व्याप्तिरतोनेन तल्लक्ष्यमिति भावः। वृत्तिमत्व्याप्यभावस्य
व्यभिचारनियतत्वाद्व्यभिचारं ग्राहयेतिनवेति। अनन्तमूर्तत्वाश्रये मनसि। ननु वन्ह्यादिभेदमादाय अव्याप्तेः प्रतियोग्यस
मानाधिकरणपदेन एव वारणादत्यंतपदं व्यर्थमतः फलमाह। अत्यंतपदं चेति। अत्यंताभावत्वनिरूपकं यत्प्रतियोगित्वं
तदाश्रयवैयधिकरण्याविवक्षायाः फलमाह अन्यथेति। तद्भेदस्य समानाधिकरणाभावांतरभेदस्य स्वरूपानतिरिक्ते
एवतयेति। अनवस्थानयेनेत्यादि। तुल्येनापत्तेरिति। हेतुसमानाधिकरणाभावमात्रस्यैव स्वात्मकभेदकप्रतियोगिप
दत्वाभावांतरं तत्समानाधिकरणत्वादिति भावः। अग्रे विवक्षणीयस्य साध्यताघटकसंबंधेन प्रतियोग्यसमाना
धिकरणपदस्य वह्निमान् धूमादित्यादौ घटघटाभावे सत्वात्तन्न सर्वत्रैवाप्रसिद्धिः। किंतु स्वरूपसंबंधेनाभावस्य सा
ध्यतायामेवेति सूचयितुमप्रसिद्धिमपहाय तुल्यं नचमुक्ते अत्यंताभावत्वनिरूपकप्रतियोगितानवच्छेदकविव
क्षायाः फलमाह सर्वेषामेवेति भावभेदस्यातिरिक्ततास्वीकारादाह अभावसाध्यकेति। तथा च घटभिन्नपटत्वा

रामः
८

पक्षत्वसमानाधिकरणस्यनिरूक्तप्रतियोगिव्यधिकरणगोत्वाधाराभावस्यघटभेदभौन्नसत्वात्तादृशाभेदस्यगोत्वाभावव
पह्वात प्रतियोगितावच्छेदकमेव घटभेदत्वमित्यव्याप्तिरितिभाव संप्रदायरहस्यस्वरसः। नद्विअंतृके विवक्षायामपि सर्वे
षां हेतुसमानाधिकरणात्यंताभावानां अत्यंताभावत्वनिरूपकत्वेण पूर्वक्षणादिवृत्तित्वविशिष्टस्वाभावाभावकेन प्रतियोगिता
समं सामानाधिकरण्यानदभावसाध्यकाव्याप्तितादवस्थ्यं यादृशप्रतियोगितावच्छेदकविशिष्टस्यअनधिकरणंहेत्वधि
करणं तादृशाप्रतियोगितानवच्छेदकत्वप्रवेशानुसर्थमेवात्यंतपदमिति ध्येयं ध्वंसत्वेनेति गवात्यंताभावस्य गोध्वंसविरो
धित्वादित्याशयः। न चैदैशिकविशेषणतया यत्र गोध्वंसस्याधिकरणं तत्रैव गवात्यंताभावस्य विरोधान्न कालिकसंबंधेन
गोध्वंसवत्यपि प्रलये न दत्यंताभावसत्वे बाधकाभावान्नाव्याप्तिरिति वाच्यं प्राचां मते भूतलादिदेशस्येव काल
स्यापि दैशिकविशेषणतया ध्वंसवत्वादत एव तेकंयुक्ते कालेपि विशेषणतया वायुस्पर्शनाशस्य ग्रहत्वाद्वा नित्यतायां
मिश्रैरुक्तं यद्यप्येवमितिमतिव्याप्तिस्तनवैः कालिकसंबंधावच्छिन्नप्रवालात्यंताभावस्येव प्रलये कालिकसंबंधेन वर्त
मानत्वान्न ध्वंसमिति दैशिकसंबंधेन वात्यंताभावस्यानुगमानन्वापि प्रतियोगिवैयधिकरण्याघटितस्यव्याप्य
वृत्तिसाध्यकस्थलीयलक्षणस्यावश्यं दैशिकविशेषणतयाऽभावे हेतुसमानाधिकरणपघटितत्वात्तस्यैवा

16

शि॰ज्ञा॰
२

नातिव्याप्तिर्वैध्यानत्वकालिकसंबंधावच्छिन्नप्रतियोगिताकस्पंदेशिकविशेषणतासंबंधेन हेतुमन्निष्ठाभावस्या
प्रसिद्ध्या तथापि नातिव्याप्तिरिति वाच्यं सृष्टिकालवृत्तित्वादिविशिष्टगोत्वात्यंताभावस्य तादृशस्य प्रसिद्धत्वादिति भा
वः। मिश्रमं निवशितुमाह संसर्गाभावेति अत्यंताभावपदेनेत्यादि। तथा च प्रलये गोत्वाद्यवच्छिन्नध्वंससत्त्वादेव नाति
व्याप्तिरिति भावः। न च गोध्वंसस्य गोत्वावच्छिन्नत्वे तास्वीकारेऽपि साध्यतावच्छेदककालिकविशेषणतावच्छिन्नप्रतियो
गिताकत्वविरहात्कुतः तमादायातिव्याप्तिव्युदानस इति वाच्यं साध्यतावच्छेदकसंबंधानवच्छिन्नस्यैव हेतुसमा
नाधिकरणाभावप्रतियोगित्वस्य लक्षणे प्रवेशनीयत्वात्तस्य च गोध्वंससाधारण्यादिति भावः। यदा स्पंद इति
गोत्वावच्छिन्ननाशानंतरं स्पंदसत्त्वाद् द्व्यणुकपर्यंतानुधावनं स्पंदवतिखंडप्रलये संसर्गांतरीयद्व्यणुकप्रागभाव
सत्त्वेन द्व्यणुकत्वावच्छिन्नध्वंसविरहादतिव्याप्तिरिति भावः। ननु महाप्रलये पूर्वत्नीयपक्षेण द्व्यणुकत्वावच्छिन्न
ध्वंससत्त्वान्नातिव्याप्तिस्तदानीमपि चरमद्व्यणुकनाशेऽप्यनुगुणस्य परमाणुस्पंदस्य सत्त्वात्कालो प्रलयपरमा
ण्वंतरसंयोगेन प्रलये पूर्वक्षण एव पश्चात्तस्य विनाशयत्वात्तादृशपरमाणुतरसंयोगस्य कार्यद्रव्येण सहैव स्वी
कारात् निष्फलं आश्रयनाशादेव नाशासंभवादित्यत आह यदा स्पष्टमिति। केचित्तु स्वमते द्व्यणुकस्याभावात्सं

राम॰
२

17

दस्य चरमं ञ प्रलये वृत्तो बलवत्तरप्रमाणाभावात् यदाहिष्टमित्याद्युक्तमिति स्माहुः ते चिरंतनित्यज्ञानमादाय स्वहेतुत्वावार
णायजन्यमिति नित्यसुखस्यापि व्यक्तेर्मोक्षत्वमते स्वहेतुत्वमभावाक्य साध्यान्तरमाह दुःखेवेति ननु कार्यमात्रं प्रत्यदृष्ट
स्य हेतुत्वात् प्रलयप्राक्क्षणेपि तस्य सत्वं तथा च तदानीमेव दुःखत्वावच्छिन्नसत्तावच्छिन्नध्वंससत्वान्नातिव्याप्तिः दुःखपा
देः स्वसाक्षात्कारनाश्यत्वे यात तदानीमसंभवात् किंच यावद्ब्रह्मांडानां युगपत्प्रलयानुपगमे ब्रह्मांडांतरेति दुःखमा
दाय स्वहेतुरेवायमत आह। यदानस्येति। अत्र तदीयस्रक्पुष्पादिसमय तदीयज्ञानविरहान् व्यभिचारस्फुट एव
द्व्यणुकत्वादेरिति खंडप्रलये केषांचिद्ध्वंसस्य केषांचित्प्रागभावस्य सत्वात् तस्य प्रतियोगित्वातिरिक्तवृत्ति
त्वेन अनवच्छेदकत्वादित्यर्थः ननु द्व्यणुकत्वावच्छिन्नवृत्तित्वविशिष्टस्यैव ध्वंसस्य प्रतियोगितावच्छेदकं द्व्यणुकत्वं अवच्छेदकं चे
चोन्यूनवृत्तित्वमेवेत्यत आह। नहीति ध्वंसादिप्रतियोगितायाः गोत्वादिधर्मावच्छिन्नत्वे मानाभावात् गौर्नष्टेत्यादिप्रतीते
गौप्रतियोगिकध्वंसाद्यवगाहितयाप्युपपत्तेः बाधनिश्चयादिप्रतिबंधकत्वाद्यनुरोधेनैव नेदात्यंताभावे योगोत्वाद्यवच्छिन्न
प्रतियोगित्वोपगमात् न चैवं तज्ज्ञानत्वाद्यवच्छिन्नवत्ताबुद्धिं प्रति तज्ज्ञानत्वावच्छिन्नाभाववत्तानिर्णयत्वेन प्रतिबंधकत्वाज्ज्ञानात्यंताभाव
स्य च तज्ज्ञानध्वंसस्यापि तज्ज्ञानत्वाद्यवच्छिन्नप्रतियोगिताकत्वमावश्यकमिति वाच्यं एकसंबंधेन एतज्ज्ञानात्यंताभावग्रहे संबं

त्रि॰ज्ञा॰
१०

तेरेणतमो मतानुधावुदयात् संबंधविशिष्टमेनतर्भाव्यात्यंताभावग्रहस्य प्रतिबंधकतया ध्वंससाध्यसाधारण्यादि याशयेनास्मतेपीति यदिच नत्संबंधातिरिक्तसंबंधानवच्छिन्नप्रतियोगिताकदशाभावत्वेन ध्वंसप्रागभावसाधारणरूपेण प्रतिबंधकत्वं तथापि तत्तद्व्यक्तित्वावच्छिन्नस्वीकारेणैव सामंजस्ये तयोः प्रतियोगितायां सामान्यधर्मावच्छिन्नत्वे मानाभावः वस्तुतस्तु प्रतिबंधकत्वानुरोधेनान्योन्याभावात्यंताभावयोरपि प्रतियोगितामवच्छेदकं कल्प्यते निरवच्छिन्नप्रकारतावच्छेदकतायाः पर्याप्तिमंतर्भाव्यैव तत्संरभावात्परंतु प्रतिबंधकाभावानां नतत्तद्धर्मावच्छिन्नाभावत्वेन कारणत्वानुरोधेन न च ध्वंसप्रागभावयोरपि तथाकरणाद्यमिति तिनत्वं ननु प्रतियोगिमत एवेत्यसिद्धं तत्राप्यत्यंताभावानुपगमादत्राह अस्येयेति नस्येति गवात्यंताभावस्येत्यर्थः तेन गगनाद्यभावस्य गोविशिष्टगोत्वाद्यभावस्य वा प्रलयावृत्तित्वमपि नक्षतिः कालपात्रेति। गवात्यंताभावस्य देशिकविशेषणतया कालयात्रावृत्तित्वं प्राच्यैरिष्टमेव सदातनत्वव्यवहारस्य कालिकविशेषणतयैव संभवादितितु दिभावनीयं ननु प्रतियोगिविशिष्टेपि काले अत्यंताभावसत्वे गवावच्छेदेनेदानीं गोत्वं नास्तीति प्रतीः कथं न स्यादत आह इयं त्विति एकस्य प्रतियोगिमतः कालस्य देशभेदः प्रतियोग्यनाधारदेशः तथाहि अत्यंताभावत्वेऽपरस्येति ध्वंसादिमतः कालस्येत्यर्थः स्वरूपावच्छिन्नमिति निरवच्छिन्नमित्यर्थः तथात्वमिति पूर्व

राम॰
१०

19

णान्वयः इदानीमस्थेनगोत्वमित्यादिप्रतीतेः कालवृत्तीनयाअस्पष्टत्तिनयाचगोत्वाभावावगाहितैयवोपपत्तौदेशस्यकाल
वृत्तितावच्छेदकत्वेमानाभावादित्यतआह देशाइति इवार्थसादृश्यंतथाचानुभवएवदेशस्यकालवृत्तितावच्छेदकत्वे
मानमन्यथागृहेनेदानींगौरित्यादिप्रत्ययवशात्गृहादिदेशस्यगवाद्यंताभाववत्तायामपिकालेनावच्छेदकः स्यात्
तत्रापिगवाभावेनगृहवृत्तित्वेकालस्येतिबोधस्यावगाहितायाःस्तकचत्वादितिभावः नन्वेवमपिप्रतियोगिवैयधिक
रण्यघटितस्याव्याप्यवृत्तिसाध्यकस्थलीयलक्षणस्यगोमान्गोत्वादित्यादावतिव्याप्तेःप्रागभावस्यघटिकालेप्रतियो
गिवैसमानाधिकरणतयालक्षणाघटकत्वादाह तच्छून्यइतिगवादिशून्येचेत्यर्थः तथाचयत्किंचिन्नेहत्वधिकरणा
वच्छेदेनप्रतियोगिवैयधिकरण्यंयदग्रेवाच्यंतस्यगवाद्यभावेपिसत्वान्नतत्रलक्षणेऽतिव्याप्तिरितिभावः नचेति
वाच्यमित्यनेनान्वयः संसर्गाभावविशेषइतिसहाननसंसर्गाभावविशेषइतिसहाननसंसर्गाभावइत्यर्थः
संसर्गेतिस्वप्रतियोगितावच्छेदकसंसर्गेणयः प्रतियोग्यारोपः तज्जन्यप्रतीतिविषयोयोभावस्तत्वमित्यर्थः संसर्गता
दात्म्येनापिभिन्नोग्राह्यः तेनभेदाप्युदासः प्रागभावध्वंसयोरप्युत्तरकालपूर्वकालावव प्रतियोगितावच्छेदकसंबंधावि
तिताभ्यामेवसंबंधाभ्यांप्रतियोग्यारोपः प्रागभावयोः प्रत्यक्षहेतुरतः तयोर्नाव्याप्तिरितिप्राच्यामसम्प्रायः घटितमि

20

नितयाच चक्रवाकादिप्रसंग इति भावः तत्रान्यत्वे नियमांतरस्य साध्यसंबंधितावच्छेदकरूपत्वादिस्वरूपस्याप्यर्थ इति केचित्
वस्तुत नियमांतरस्य संसर्गत्वघटितनियमस्य संसर्गत्वे च विशिष्टधीजनकत्वांजनकत्वे च नियमघटितमिति क्रमेणासं
सर्गत्वमध्यनियमप्रवेशोपीति भावः अत्र संसर्गाभावत्वे तत्रापि तद्दस्याद्वृत्तित्वस्यैव निवेशादिति भावः आहुरित्यस्वरसं
प्रकाशयति वक्ष्यते चेत्यादि हृदनान्यत्वाभाववद्बोधे प्रतियोग्यरोपस्य हेतुत्वे मानाभाववदुक्तसंसर्गाभावघटितलक्षणस्य
संभवः कथंचिदनावत्तौ किंतु प्रत्यक्षं प्रत्यारोपस्य हेतुतास्वीकारेप्यतीन्द्रियसाध्यकव्यभिचारिण्यातिव्याप्तिः तत्र हेतु
समानाधिकरणसाध्याभावस्यातीन्द्रियतया निरुक्तसंसर्गाभावत्वविरहादत आह वक्ष्यते चेति ह्रदभेदाभिन्नाभावत्वे भेद
त्वं तु संसर्गविधया तादात्म्यावच्छिन्नप्रतियोगिताकाभावत्वमनुयोगिताविशेषो वेत्याशयः यत्तु भेदत्वादिवत् संसर्गाभावत्व
मखंडोपाधिरिति तत्तुच्छं भेदत्वादिवत्संसर्गाभावत्वस्यानुभवेनाविषयीकरणात् लौकिकव्यवहारस्य भेदभिन्नाभाव
त्वादिनाप्युपपत्तेः वस्तुगतिमनुरुध्याह अनुपदमिति विवेचयिष्यत इति तद्रूपी वा नोपादेयमित्यादिग्रंथेनेति शेषः
साध्यतावच्छेदकसंबंधेन प्रतियोगिव्यधिकरणघटितं लक्षणमभिप्रेत्याह प्रयोजनविरहादिति धूमादिसमानाधि
करणस्य च वन्ह्यादिभेदस्य प्रतियोगिसमानाधिकरणत्वादेव तमादायाव्याप्तिविरहादिति भावः व्याप्यवृत्तिसाध्यकस्थले
यल्लक्षणस्य साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताघटितत्वात् तदभिप्रेत्याह अव्याप्तिश्चेति तादात्म्येन गवादेः साध्य

21

तायां तत्संबंधावच्छिन्नात्यंताभावाप्रसिध्या सत्तावत्वादावव्याप्तिरित्यर्थः इदमपि अभाववृत्तिरभावः नाधिकरणस्व
रूपेनवाधमात्यंताभाव एव धर्मिणो भेद इति मतेन अन्यथा पटभिन्नरूपस्य घटत्वात्यंताभावस्य पटत्वात्यंताभावस्य
वा पटनिष्ठप्रतियोगितायां एव तादात्म्यसंबंधावच्छिन्नत्वादव्याप्तिविरहादिति ध्येयं। ननु विषयतायाः वृत्त्यनियाम
कमते ज्ञानाभावस्य गगनादौ सहजत एव प्रतियोगिव्यधिकरणत्वानातिव्याप्तिरत आह। विशेषगुणेति अत्र व्यभि
चारनिरूपकं कालादिकं तत्र च काले कालिकेन दिशि च दैशिकसंबंधेन विशेषगुणस्य सत्वात्तदभावेन प्रतियोगि
व्यधिकरणत्वमिति भवत्यतिव्याप्तिः विशेषपदे व्यभिचारित्वरक्षायै द्रव्यत्वादियुक्तौ संबंधसामान्येन विशेषगुण
स्य सत्वान्नातिव्याप्तिसंभवः कालोपाधित्ववद्दिगुपाधित्वस्यापि मनस्यसत्वाद्व्यावर्तकत्वात् अन्यथा मनसः
कालोपाधित्वमपि स्यादत उक्तं मनोत्यतियनुमात्रस्यापि मूर्तमात्रस्य दिगुपाधित्वं महादिग्वृत्तितायामवच्छेदकत्वं
नत्वधिकरणत्वमिति प्राच्यामते संबंधसामान्येनैव तस्य विशेषगुणानधिकरणत्वान्मनोन्यपदमिति तन्मतं एव
मप्यवच्छेदकतासंबंधेनैव मनसो विशेषगुणवत्तायाः संबंधेन मनोन्यत्वस्याव्याप्त्यापत्तेः ननु स्वमते दिक्कालयोरपीश्वरा
नतिरिक्तत्वादत्र व्याप्ये सरेवेत्यन आह ज्ञानानि न चन्द्रे ज्ञानाप्यवृत्तितया तत्साधके प्रतियोगिव्यधिकरणप्रवेशादेव नाति
व्याप्तिरिति वाच्यं समवायेनाव्यापकत्वग्रहदशायामपी संबंधसामान्येन प्रतियोगिवैयधिकरणघटितव्यापकत्व

ज्ञानात्समवायेनजात्यनुमित्यापत्तेरेवअतिव्याप्तिपदार्थत्वाज्जातेरपिप्रागुक्तव्याप्यवृत्तित्वविरहाच्चअतिव्याप्तिः।योजयतिसाध्यशून्येतिविशेषणतादिक्कृताकालिकीचएकार्थेति।समवायस्यापि।स्वात्मकएवस्वरूपसंबंधइतितत्रापीजात्येकार्थसमवायोस्तीत्याशयः।प्रतियोगिनेति।तथाचतानाघटाभावस्यतादात्म्येनसंबंधेनघटादौप्रतियोगिव्यधिकरणत्वान्नातिव्याप्तिः।नचतादात्म्यायत्किंचित्संबंधेनप्रतियोगिसामान्याधिकरणाभावोक्तौवह्निसामान्याभावस्यापिधूमवत्पर्वतावच्छेदेनमहानसीयसंयोगेनप्रतियोग्यसमानाधिकरणत्वाद्वह्निमान्धूमादित्यादौअव्याप्तिःस्वप्रतियोगितावच्छेदकसंबंधसामान्येनतथात्वोक्तौजातीमान्जादित्वादित्यादावतिव्याप्तिःसमवायेनजात्यभावस्यैवतादात्म्येनजातिमद्भेदत्वात्तस्यचस्वप्रतियोगितावच्छेदकतादात्म्यसंबंधेननप्रतियोगिसंबंधितद्वृत्तित्वाभावस्योक्तत्वात्संयोगसामान्यावच्छिन्नवह्न्याद्यभावप्रतियोगितायाःमहानसीयसंयोगत्वादिविशिष्टेनानवच्छेद्यतयावह्न्यभावस्यपर्वतादौमहानसीयसंयोगसंबंधेनप्रतियोगिसामानाधिकरण्यविरहेप्यव्याप्त्यसंभवादितिध्येयं।ननुसमवायावच्छिन्नवह्न्यभावमादायधूमादावव्याप्तिवारणार्थमग्रेसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिकत्वंनिवेशनीयंतथाचकपिसंयोगवतःतादात्म्येनसाध्यतायांएतद्वृक्षत्वादित्यादावव्याप्तिर्भेदमात्रस्यैवस्व

प्रतियोगितावच्छेदकतादात्म्येनसंबंधेन प्रतियोग्यधिकरणाप्रसिद्धेरत आह संबंधीवेति। तदेव घटयति भव
तिचेति न च तादात्म्येन वृक्षमात्रस्यैवव्याप्यवृत्तित्वात् तादृशसंबंधेन साध्यतायां प्रतियोगिवैय्यधिकरण्याप्र
वेशादिसमयुक्तमिति वाच्यं मूलावच्छेदेन कपिसंयोगवद्भेदस्य वृक्षादौ स्वयमंगीकारात् तादात्म्येन कपिसंयो
गतोप्यव्याप्यवृत्तित्वात् न चैवं प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावेयाप्तिमन्निष्कर्षेप्यप्रतीकारः प्रतियो
गितावच्छेदकसंबंधेन यद्यत्प्रतियोगिसंबंधितत्तद्व्यक्तित्वावच्छिन्नभेदकूटविशिष्टहेतुमद्वृत्तित्वस्यैव तत्र व
तव्यत्वात् वृक्षत्वस्य तादात्म्येन संबंधेनापि न कस्यचित् प्रागुक्तव्याप्यवृत्तित्वमतो यथाश्रुतमेव सम्यक्। केचि
त्तु प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितायां यद्धर्मावच्छिन्नत्वयत्संबंधावच्छिन्नत्वोभयाभाववन्नि
स्यादिवक्ष्यमाणनिष्कर्षस्य तादात्म्येन साध्यतायां व्यभिचारिण्यातिव्याप्तिः अतः प्रतियोग्यनधिकरणत्वं परि
त्यज्य प्रतियोग्यसंबंधित्वमवश्यं तत्र निवेश्यमित्याशये संबंधित्वमुक्तमित्याहुः। ननु कपिसंयोगाभावस्यापि
समाना गुणादौ प्रतियोग्यनधिकरणत्वेपि ~~यस्य प्रतियोगिसंबंधि~~त्वात् कपिसंयोगी एतत्वादित्यादावव्याप्तिरत आह त
द्विशिष्टस्येति प्रतियोगिसामानाधिकरण्याभावविशिष्टस्येत्यर्थः तथा च हेतुमति वृक्षादौ संयोगवद्वृत्त्वाभावविशिष्टः

24

संयोगाभावोनात्मीतिनाव्याप्तिः विशिष्टनिरूपिताधेयत्वमप्यतिरिक्तमित्याशयेनेदेयेयद्वानद्विशिष्टेत्यस्य हेत्वा
धिकरणेऽन्वयः तत्र षष्ठ्यर्थः अधिकरणत्वं तेन विशिष्टस्याधिकरणं यत्तद्वृत्तित्वमभावो वाव्याप्तिरित्यर्थः यद्यपि
प्रतियोग्यसामानाधिकरणत्वं हेतुविशेषणीकृत्य प्रतियोग्यसामानाधिकरण्यविशिष्टो यो हेतुस्तदधिक
रणवृत्तिरभावस्य प्रतियोगितानवच्छेदकत्वं व्याख्येयं तावतैव संयोगिएतत्त्वादित्यादौ नाव्याप्तिस्य प्रतियोगि
वैयधिकरण्यावच्छिन्नहेत्वधिकरणाभावात् तथापि कर्मणि संयोगाभावः प्रतियोग्यसमानाधिकरणस्य
ग्रिममूलस्वरसेन हेतुसमानाधिकरणाभावस्यैव विशेषणे प्रतियोग्यसमानाधिकरणत्वदलमत एवोतो
न्प्रयासङ्गत्येवध्येयं ननु भेदस्य व्याप्यवृत्तितया प्रतियोगिसमानाधिकरणाभिन्नत्वे तैयेवाव्याप्तिवारणसं
भवेत तद्विशिष्टस्येत्यादिकं विफलमत आह तद्वृत्तीति प्रतियोगिमद्वृत्तिभिन्नत्वमित्यर्थः अत्र निजस्वरसादि
त्यन्वयः नतवदभाववत्त्वमिति तथा च संयोगिसत्त्वादित्यादावतिव्याप्तीरितिभावः ननु संयोगाभावे गुणे
नसंयोगसामानाधिकरण्यमिति प्रतीतिबलादेव गुणावच्छेदेन संयोगाभावप्रतियोगिसामानाधिकरण्य।
भावसत्त्वान्नातिव्याप्तिरत आह प्रतीतेरिति उक्तप्रतीतिः संयोगाभावनिष्ठस्य संयोगसामानाधिकरण्य

स्यअवछेदकत्वाभावमेव गुणाद्यावगाहत इति भावः।वक्ष्यति मूलकारः।तच्च।तदपि।हेत्वधिकरणवृत्ति।तेन कपिसं
योगाभावस्य प्रतियोगिवैयधिकरण्यावछेदकीभूतगुणाद्यवछिन्नत्वेपि कपिसंयोगी एतत्वादित्यादौ नातिव्याप्ति
रिति भावः ननु हेत्वधिकरणे प्रतियोगी वैयधिकरण्यावछेदकावछिन्नत्वं प्रतियोगिसामानाधिकरण्यानवछे
दकीभूतहेत्वधिकरणवृत्तित्वं तच्चाव्याप्यवृत्तेरवछेदकविरहादप्रसिद्धं गुरुतरं चेत्यत आह प्रतियोग्यनधिकरणे
स्यादिकं स्याचेदिति अनधिकरणमिति परेणान्वयः तद्घटकं तरेतिप्रतियोगिव्यतिकं तरेत्यर्थः समाने संयोगसा
मान्याभावस्य केवलान्वयित्वात्तत्साध्यकसत्वादिकं सद्धेतुरेवातः साध्यान्तरमाह द्रव्यत्वाभावेति यद्यपि
द्रव्यत्वाभावस्याव्याप्यवृत्तित्वान्तत्साध्यके प्रतियोगिवैयधिकरण्याप्रवेशेनादिदमसंगतं चात्र कालिकसंबं
धावछिन्नद्रव्यत्वाभावः साध्यः सच गुणावछेदेन कालान्तरेणाव्याप्यवृत्तिरिति वाच्यं।तथासति तस्य केवला
न्वयित्वात्साध्यकसत्वादेः सद्धेतुत्वेन तत्रापि तत्संन्यासस्यानौचित्यात् तथापि सयहेतौ द्रव्यत्वाभावस्य
व्यभिचारधीदशायामपि प्रतियोगिसामान्यानधिकरणसत्ववन्निष्ठाभावप्रतियोगितानवछेदकं द्रव्यत्वा

त्तिव्या

26

भावत्वमित्याकारकव्यापकत्वज्ञानादनुमित्यापत्तिरेवात्रातिव्याप्तिरित्यर्थः। वस्तुतो द्रव्यत्वाभावं व्यापिन प्रागुक्त
व्याप्यवृत्तित्वमिति ध्येयं। प्रथमे साध्येऽतिव्याप्तिं ग्राहयति साध्याभाववदवृत्तीति। तत्प्रतियोगिति। तस्य संयोगा
त्मनः साध्याभावस्य यः प्रतियोगि विशेषाभावस्तद्वत्वादित्यर्थः॥ द्वितीयेऽतिव्याप्तिं योजयति। नित्यत्वादिति
नित्यत्वादिति विशिष्टं यद्द्रव्यत्वं तदभावात्मको यः साध्याभावस्य प्रतियोगिनदधिकरणत्वात् साध्याभाववतो
द्रव्यस्येति पूर्वेणान्वयः। ननु विशिष्टद्रव्यत्वाभावेन द्रव्यत्वस्वरूपसाध्याभावस्य प्रतियोगि किंतु विशिष्टद्र
व्यस्यैवेति द्रव्यत्वप्रतियोगिव्यधिकरणमेवेत्यत आह। स्वाभावेति स्वनित्यवृत्तित्वविशिष्टद्रव्यत्वं न च नित्य
वृत्तित्वविशिष्टद्रव्यत्वाभावो नास्तीति प्रसंगात् प्रतीतेः। किंतु नित्यैकत्वादिकमेवेति नातिव्याप्तिर्वाच्येरि
तिभावः। विशिष्टाधिकरणतायाः प्रतीतौ नियामकत्वं तयैवातिप्रसंगभंगात् द्रव्यत्वपक्षेऽपि नित्यावृत्तसंख्या
परिमाणादेर्वाहृत्याभावकल्पनायां गौरवात्। नन्वेवमपि निरवीत्वाभावस्यैषाश्रयो नद्यत्किंवृत्तित्वविशि
ष्टं यत्स्वं तदभावात्मकस्य प्रतियोगिनां सहसोमानाधिकरण्यात् प्रतियोगिव्यधिकरणाभावाप्रसि
द्धैव नातिव्याप्तिरेकव्यक्तिमात्रवृत्तीनां गुणाद्यात्मकाभावानामपि पूर्वक्षणवृत्तित्वविशिष्टस्य स्वस्य

राम०
२४

येऽभावस्तादृश। प्रतियोगिना सार्धं समानाधिकरणत्वान्नच वक्ष्यमाणखंडशः प्रसिध्या गगनाद्यभावप्र
तियोगिव्यधिकरणः तस्यापि नित्यवृत्तित्वविशिष्टो यः गगनाभावः तदभावात्मकेन स्वप्रतियोगिना सम
नाधिकरणत्वात् । गगनाभावस्यैव संयोगादिसंबंधेनाभावत्वावच्छिन्नाभावतया खंडशः प्रसिध्यापि तस्य
प्रतियोगिव्यधिकरणत्वानसंभवाच्च। एतेन नित्यत्वविशिष्टस्य गगनाद्यभावस्य योऽभावस्तदभावत्वे
गगनाभावस्य केवलान्वयितया जन्येपि नित्यवृत्तित्वविशिष्टस्य गगनाभावस्याभावो नास्तीति प्रतीति
प्रसंगात् किंतु नित्यत्वादेरेव तथात्वनिरुक्तावपि न निस्तारः इति चेदत्र नव्याः यथाश्रुते प्रागुक्तक्रमेव
प्रतियोगिव्यधिकरणाभावस्याप्रसिध्या वह्निमान् धूमादित्यादावव्याप्तिरतः यत्किंचित्स्वप्रतियोगित्वं
यादृशसंबंधावच्छिन्नं तादृशसंबंधेन स्वप्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणं यत्साधनाधिक
रणं तन्निष्ठाभावस्य साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वमेव लक्षणे प्रवेशनीयं तथा
च सद्धेतुस्थले रूवद्रव्यत्वाभाववान् सत्तादित्यत्रापि संयोगेन घटाभाव एव प्रतियोगिव्यधिकरणः यदीयं
घटनिष्ठप्रतियोगित्वं यादृशसंयोगेनावच्छिन्नं तादृशेन संयोगसंबंधेन साधनवद्वृत्त्यस्य तदीयप्रतियोगि

तावच्छेदकावच्छिन्नानधिकरणत्वात् नचैवमपि तदीयसाध्यतावच्छेदकीभूतस्वरूपसंबंधावच्छिन्नप्रतियोगित्वस्याप्र
सिध्यानदोषसंगतिः पूर्वलक्षणावृत्तित्वादिविशिष्टस्य घटाभावस्याभाव एव नह्यसिद्धिरित्याहुः स्वावच्छेदकसंबंधाव
च्छिन्नप्रतियोगिसामान्यानधिकरणहेत्वधिकरणवृत्त्यभावप्रतियोगिनासामान्येयत्संबंधावच्छिन्नत्वयद्धर्मावच्छि
न्नत्वोभयाभावद्वयगर्भलक्षणमपि प्रायेणेदं संयोगेन घटाभावस्यैव प्रतियोगिवैय्यधिकरण्यपसौलक्ष्यादिस्
पिवदंति प्राचांमते संयोगसामान्याभावसाध्यकमात्मत्वं विभुत्वमतः कपिसंयोगाभावउक्तः वृक्षादिवृत्तिकाला
वदंतिप्राचांमतेछेदेन सामान्याभावसत्वाद्वृक्षादिनोक्तं परिहृत्यात्मत्वहेतुरुक्तः यद्यपि वृक्षादेः स्वसमवेतत्वमपि
संयोगिनः समवेतसामान्याभावस्य द्रव्यमात्रसमवेताभावस्य चानधिकरणत्वाद्वृक्षत्वादेरपिहेतुतायामव्या
प्तिः संभवत्येव तथापि सत्ताद्रव्यत्वयोरेव समवेताभावद्रव्यमात्रसमवेताभावयोरभाववत्वं लाघवात् ननु कपिसंयोगा
द्यात्मकसमवेतमात्रस्य नत्वं गौरवादित्यत आहुः नगुणसामान्याभावस्य संयोगप्रतियोगित्वमाविष्कृतं गुणानामपि
स्कत्वेतत्प्रतियोगीनेति कपिसंयोगीव्यप्रतियोगिनावच्छेदकेत्यर्थः नच गुणसामान्याभावस्याभावाद्रव्यत्वमेव
लाघवान्ननु गुणः गौरवादतः संयोगप्रतियोगित्वं न गुणसामान्याभावस्येति वाच्यं घटादावुक्तनिरुक्तायां

29

(गुणसामान्याभावस्यैव सत्वेन द्रव्यत्वस्य तदभावत्वासंभवात् अभावाभावस्य प्रतियोगित्वनियमाच्चेति भावः व्या
वृत्तेति तथाच गुणसामान्याभावनिष्ठप्रतियोगितानवच्छेदकं गुणसामान्याभावत्वं हेतुमतस्तदवच्छिन्नानधिक
रणत्वेपि कपिसंयोगाभावत्वस्य तादृशप्रतियोगितानवच्छेदकत्वान्न तद्रूपेण साध्यताया मात्मत्वहेतौ नाव्याप्तिः
द्रव्यत्वाभाववान् सत्वादित्यादौ तु द्रव्यत्वाभावत्वावच्छिन्नानधिकरणं हेतुमन्निष्ठाभावस्य तादृशप्रतियोगितावच्छेद
कमेव द्रव्यत्वाभावत्वमतो नातिव्याप्तिरिति भावः अत्र प्रतियोगितावच्छेदकधर्मावच्छिन्नत्वं साध्यतावच्छेदकता
घटकसंबंधेन ग्राह्यं तेनायः पिंडस्य कालिकसंबंधेन धूमत्वविशिष्टस्य तृणादिकसंयोगेन तस्याधिकरण
त्वेपि धूमवान् वन्हेरित्यादौ नातिव्याप्तिः प्रतियोगितावच्छेदकताघटकसंबंधेन तदवच्छिन्नत्वानिवेशान्नु प्रतियो
गितानवच्छेदकत्वमित्यत्र अवच्छेदकत्वे साध्यतावच्छेदकताघटकसंबंधेन ग्राह्यं अन्यथा विषयतासंबंधेन
तद्रूपत्वावच्छिन्नस्य पृथिव्यादौ समवायेनाभावस्य सत्वात् पृथिवीत्वादित्यादौ अव्याप्तिप्रसंगात् वस्तुतः साध्यता
वच्छेदकताघटकसंबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वं तन्निरूपितस्वरूपसंबंधेनैव निरुक्तप्रतियोगि
तावच्छेदकत्वस्याभावः साध्यतावच्छेदकधर्मे वक्तव्यः तेन वन्हिमान् धूमादित्यादौ यत्र वन्हित्वादिनिरूपित

त्रि॰ला॰
९६

समवायादिसंबंधेनवह्नित्वादेः साध्यतावच्छेदकताघटकसंबंधावच्छिन्नं यत्प्रतियोगितावच्छेदकत्वं तन्निरूपित
स्वरूपसंबंधेनैव निरुक्तप्रतियोगितावच्छेदकत्वस्य भावः साध्यतावच्छेदकधर्मे पर्याप्तेत वह्निमान्धू
मादित्यादौ यत्र वह्नित्वादिनिरूपितसमवायादिसंबंधेन वह्नित्वादेः साध्यतावच्छेदकत्वं तत्र तादृशसंबंधा
वच्छिन्नस्य प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्य प्रसिद्धावपि न क्षतिरिति ध्येयं
अत्र यादृशप्रतियोगितावच्छेदकत्वधर्मे यादृशप्रतियोगिताश्रयाधिकरणीभूत यद्यद्व्यक्तिनिष्ठानधिक
रणतावच्छेदकत्वस्य अधिकरणतावच्छेदकत्वस्य च द्वयोर्व्यतिरेकः तद्व्यक्तिभेदकूटत्वमेव यादृशप्रतियो
गितावच्छेदकावच्छिन्नानधिकरणत्वमिति यस्यार्थो बोध्यः तेन न धूमवद्वित्यादिप्रतीतेः अश्वस्यत्वे माप्तिः पूर्वं
तेषांहि महानसद्धूमे विशिष्टनिष्ठतत्तद्धूमत्वाद्यवच्छिन्नाधिकरणताभिरेवोपपत्तौ धूमत्वाद्यखंडधर्मावच्छिन्ना
धिकरणतायां मानाभावात् धूमादिसामान्याभावप्रतियोगितावच्छेदकं यद्धूमत्वादिकं तदवच्छिन्नाधिकर
णताप्रसिद्धावपि धूमवान्वह्नेरित्यादौ नातिव्याप्तिः धूमाधिकरणतत्तद्व्यक्तिभेदकूटत्वमादायैव धूमसामा
न्याभावस्य प्रतियोगितावच्छेदकावच्छिन्नं वैयधिकरण्यसंभवादिति ध्येयं। नन्वत्र प्रतियोगित्वं नातिरिक्तप

राम॰
९६

दार्थः प्रतियोगित्वादिकं तु स्वरूपसंबंधरूपमुत्तरग्रंथविरोधात् किंतु स्वरूपविशेषः सच यदि प्रतियोगित्व
स्वरूपः तथा वह्निमान् धूमादित्यादौ सर्वत्रासंभवः धूमादिस्वरूपस्यैकस्यैव घटाद्यभावप्रतियोगित्वस्य
समवेतत्वज्ञेयत्वाद्यवच्छिन्नतया तादृशावच्छेदकीभूतज्ञेयत्वाद्यवच्छिन्नस्य हेतुमति सत्त्वात् प्रतियोगिव्यधि
करणाभावाप्रसिद्धेः नच प्रतियोगितावच्छेदकस्वरूपमेव प्रतियोगित्वमित्यदोषः समवायेन वन्हेः साध्यत्वे
धूमादावतिव्याप्तिप्रसंगात् समवायावच्छिन्नवन्ह्यभावस्य वह्नित्वरूपं समवायवत् संयोगस्यापि तदवच्छेद
कतया स्वावच्छेदकीभूततादात्म्यसंबंधेन साधनतः प्रतियोग्यनधिकरणत्वाभावात् प्रतियोगितावच्छेदकी
भूतयत्किंचित्संबंधेन प्रतियोग्यनधिकरणत्वोक्तौ वान्यतरद्वारकं तु संयोगेन वह्निसाध्यके धूमादावव्याप्तिः
समवायावच्छिन्नवन्ह्यभावस्यैव समवायेन सप्रतियोगि[illegible]धिकरणस्य वह्नित्वस्वरूपं वा यत्प्रतियोगित्वं त
दपि कस्यचिदभावस्य केनचिद्धर्मेण संबंधेन चावच्छिन्नत्वं व्यवहारबलात् ननु सर्वेण संबंधेन धर्मेण वा समवा
यावच्छिन्नवन्ह्यभावप्रतियोगित्वं संयोगावच्छिन्नत्वाभिमतिव्यवहाराभावात् तथा च यदभावीययत्प्रतियोगिताव
च्छेदकत्वं संबंधेन यदभावीययत्प्रतियोगितानिरूपितावच्छेदकीभूतधर्मावच्छिन्नसंबंधित्वं हेतुमतस्तदभावी

त्रि०ज्ञा०
९७

यत्प्रतियोगितानिरूपितावच्छेदकीभूतधर्मावच्छिन्नसंबंधित्वं हेतुमतस्तदभावीयतत्प्रतियोगितानिरूपितानव
च्छेदकताश्रयत्वं साध्येनावच्छेदकेति निवेशनीयमित्यदोषः यत्प्रतियोगित्वमपहाय यादृशप्रतियोगित्वस्याभिधाना
देस्तादृशार्थलाभान्नच प्रतियोगितावच्छेदकरूपं यदि प्रतियोगित्वं तदा तदभावीययादृशप्रतियोगिताव
च्छेदकसंबंधेन तादृशप्रतियोगित्वावच्छिन्नस्यानधिकरणत्वं हेतुमत इत्येवसम्यक् प्रतियोगितावच्छेदकवह्नि
त्वानधिकरणत्वप्रवेशो व्यर्थ इति वाच्यं वह्निधूमोभयवान्वह्नेरित्यादावतिव्याप्त्यापत्तेः हेतुमन्मात्रस्यैव
वह्निधूमोभयत्वावच्छिन्नाभावीयप्रतियोगित्वावच्छिन्नानधिकरणत्वादित्यस्मद्गुरुचरणाः ग्राह्यसामानाधि
करण्यमिति परामर्शे ग्राह्यसाध्यसामानाधिकरण्यपदस्यार्थः संबंधविशेषेणैव साध्यसाधनयोः सामानाधि
करण्यज्ञानादनुमितिः तद्धि प्रतिबंधकतयैव विरोधस्य हेत्वाभासत्वादितिमनेनेदं यदुक्तं येन केनापि संबंधे
न साध्यसाधनयोः साध्यसामानाधिकरण्यज्ञानादनुमितिः स्वव्यापकसाध्यसंबंधितामात्रं व्याप्तिः व्याप
कत्वदले साध्यसाधनयोः संबंधविशेषनिवेशनादेवातिप्रसंगभंगादिति भाव्यनेन तदा परामर्शेन साधनस्या
नुमित्सा च साध्यस्य च ग्राह्यं यत्पक्षतावच्छेदकेन साध्यसामानाधिकरण्यं तत्र प्रविष्टो यादृशसंबंध इत्यर्थो वा

नाम०
९७

33

१८

यः धूमवान्वह्नेरित्यादौ महानसीयसंयोगेन सद्धेतौ संयोगमात्रेण हेतुमत्तामादायाव्याप्तिः द्रव्यं द्रव्यत्वसाध्यके
पमनुयोगिकसमवायेन सत्वादित्यादिहेतौ समवायमात्रेण तद्धेत्तामादायापि त्यधीहाय यादृशसंबंधे इत्युक्तं।
साध्यस्येचेति। ग्राह्यसामानाधिकरण्यप्रविष्टइत्यन्वयः धूमाधिकरणे तत्संयोगेन वह्निसामान्याभावसत्वा
द्वह्निमान्धूमादित्यादावव्याप्तिरतो यादृशइत्युक्तं केनेन संबंधेन हेतुमान्नित्यस्य फलमाह धूमसमवायीतिप्रति
योगितायाइति अवच्छेदकत्वेपि वह्नित्वस्य न क्षतिरित्यन्वयः साध्यस्येचेत्यादेः फलमाह धूमसंयोगइत्यादिना
नुतादात्म्येन गवादेः साध्यत्वे सास्नादावव्याप्तिस्तत्र साधनवन्निष्ठान्योन्याभावप्रतियोगितायाः साध्यतावच्छे
दकतादात्म्यसंबंधावच्छिन्नत्वे मानाभावस्य स्वयमेव दीधितिकारटिप्पण्यामुक्तत्वात् एवं धनी चैत्रत्वादित्यादौ
वृत्यनियामकसंबंधेन धूमादेः साध्यतायामपि तादृशसंबंधावच्छिन्नप्रतियोगिताप्रसिद्धेरत आह यद्वेति परं तु।
ननु प्रतियोगितावच्छेदकयावत्संबंधेन यादृशप्रतियोगितावच्छिन्नानधिकरणत्वं वक्तुं न शक्यते धूमाभा
वस्य विशिष्टाभावनिष्ठस्य प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वाप्रसिध्याऽतिव्याप्तिः न च स्वप्रतियो
गितावच्छेदकसामान्यमेव यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं वक्तव्यं तथा च प्रतियोगितावच्छे

दक्कालिकसंबंधावच्छिन्नधूमाभावनिष्ठप्रतियोगितावच्छेदककालिकसंबंधेनायोगोलके धूमस्य वर्त्तमानतया धूमा
भावप्रतियोगित्वे व्यधिकरणत्वानुपपत्तेः अतः प्रतियोगितावच्छेदकयत्किंचित्संबंधेनैव वृत्त्यंप्रतियोगितावच्छेद
कमहानसीयसंयोगरूपयत्किंचित्संबंधेन प्रतियोगिव्यधिकरणत्वाद्वह्निमान् धूमादित्यादावव्याप्तिः यादृशेत्या
दिकमस्य च संबंधांशोऽनुक्त्वा रत्नमाह यद्वेत्यवदंतियत्तु प्रतियोगितावच्छेदकसंबंधेन वैयधिकरण्यं प्रवेश्यं पुनः
प्रतियोगितायाः साध्यतावच्छेदकसंबंधावच्छिन्नत्वविवक्षायां गौरवमतो यद्वेत्यादिकरसादितन्मदंतं संबंधांतराव
च्छिन्नतदभावप्रतियोगितावच्छेदकत्वे दकत्वघटितलेतरपदेत्यादिकल्पनेनेव गुरुत्वादित्याहुः संबंधेनेदेन साध्यताव
च्छेदकसंबंधेनेत्यर्थः ननु संबंधविशेषणं साध्यसाधनयोः सामानाधिकरण्यप्रवेशे तादात्म्येन हेतुसाध्याभाव
अव्याप्तिः तादृशसंबंधेन साध्यसाधनयोरधिकरणाप्रसिद्धिरित्यत आह एवं स्थितेति संबंधविशेषणत्वप्रवेशस्थितं
इत्यर्थः सामानाधिकरण्यादाविशयादिना हेतुसामानाधिकरण्यप्रविष्ठहेत्वधिकरणत्वस्य परिग्रहः प्रयोजनमाह
तथाचेति धर्मिणोपीति तादात्म्येन व्याप्यत्वे व्यापकत्वं च निर्वहतीत्यर्थः अन्यथा तादात्म्येन हेतोः साध्यस्य चाधि
करणाप्रसिद्ध्या न ते निर्वाह इति भावः योऽन्योन्याभावः योऽभाव इत्येव वक्तुमुचितं अन्योन्याभावत्वनिवेशे वैय

राम०

ध्यादिति ध्येयं तस्य नवच्छेदकवह्निमत्त्वेति वह्निमत्त्वं व्याधिकरणात्वंतच्छाधीकरणव्यक्तीनां भेदेप्यभिन्नमेवेसाद्य।
यनेदं अत्र साध्यसाधनयोरेवतदीयसंबंधयोरप्यभेदेन व्याप्तिग्रहे तादात्म्येन हेतुसाध्यस्थले हेतुनिष्ठाभाव
प्रतियोगितानादात्म्येन धर्मिणो धर्मव्याप्यतायामपि सिद्धान्तद्धयत्तत्राह अत एवेति धर्मिणो धर्मव्याप्यत्वादे
वेत्यर्थः तत्रव्यतिरेके कादिग्रंथेन तु समवायजलत्वादेः पृथिवीत्वाभावव्याप्यत्वपरतयैव तद्ग्रंथसंगतिरिसर्वा
क्यतयामति पृथिव्यां जलत्वाभिन्नेस्साधनार्थं तदुपन्यासो तस्याव्यापकतात्वेन व्याप्यताघटकसंबंधावच्छिन्नव्या
प्याभावस्यैव सिद्धिरित्यन्वयं दृष्टान्तपूर्वं परिहरति यथा चेति धूमावयववृत्तिनवह्निधीरित्यन्वयः कथमिति
नियममुपपद्यत इति परेणान्वयः महानसे संयोगेनेति निवर्तनमित्यन्वयः न संयोगावच्छिन्नाभावानुमि
तौ नाप्तन इत्यर्थः निवर्तनेचेति धूमइतिपरेणान्वयः तादात्म्येनैवेति समवायेन व्याप्यतायां तु समवायेन जल
त्वात्यंताभाव एव सिद्धेरिति जलत्वेन द्साधनार्थं नद्ग्रंथावतारो न स्यादिति भावः नन्वेतावताऽपि तादात्म्यसंबंधेन जलत्वा ना
भावसिद्धेर्न तु जलत्वान्यान्याभावइतिनदोषस्तावद्वस्तुमतआह स एवं चेति धर्मिणो धर्मव्याप्यत्वेपकत्वे युक्तिमप्याह
व्याप्यत्वे प्राचां संमतमुपन्यस्य धर्मिणो धर्मव्यापकत्वेन संवादमाह रक्षं च इत्थमेवचेति धर्मिणो धर्मव्यापकत्व

36

युक्तिमप्याह अतएवचेत्तिधर्मिणोधर्मव्यापकत्वादेवनतुद्वयंगौरीत्यनुमितिगवेतरावृत्तित्वरूपायाःशुद्धगोत्वनि
रूपितव्याप्तेःज्ञानान्निरवच्छिन्नगोत्वसाध्यकद्रव्यसमवायेननभविष्यतिसाध्यवदन्यावृत्तित्वरूपायाःव्याप्तेरनुमिति
हेतुत्वस्याग्रेवाच्यत्वादेतस्तादृशानुमित्यनुरोधात्धर्मिणांव्यापकत्वस्वीकारोऽनुचितइत्यतउक्तंगोत्वऽहेतिगो
त्वंगवेतरावृत्तित्वंतथाचगवेतरावृत्तित्वरूपायाःगोत्वव्याप्तेरतानदृशायामुभन्नायाःअयंगौरित्यनुमितेःगोत्व
विधेयकत्वासंभवाद्गोविधेयकत्वमेवेतितदनुरोधादवश्यंधर्मिणोव्यापकत्वंवाच्यमितिभावः ननुगोःसाध्यत्वेगोत्वे
हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकमित्याहैप्रकारकधियोऽनुमितिहेतुत्वंतत्रचधर्मितावच्छेदकविधेयेवगोत्व
स्याग्रहस्यापि।क्षितत्वात्तदग्रहेविधेयकानुमितिरप्युपपन्नेत्यतआहआदीति आदिनापक्षधर्मताग्रहः तथाच
गवेतरावृत्तित्वरूपव्याप्तेःस्वव्यापकताग्रहेधर्मितावच्छेदकतयोपस्थितिध्रौव्येपितद्विशिष्टस्ययत्रनपक्षता
धीतत्रैवायंगौरित्यनुमितेःगोविधेयकत्वमात्राकमितितदनुरोधेनैवतादात्म्येनव्यापकत्वंवाच्यमित्यभिप्रायः
यत्तुशुद्धगोत्वावच्छिन्नविधेयकानुमितिप्रतिगोत्वनिष्ठनिरवच्छिन्नविशेष्यताकमेवप्रतियोगितानवच्छेदकत्वज्ञा
नंहेतुरतोगोत्वत्वाग्रहेपिगोत्वस्यासास्नादिव्यापकतावच्छेदकत्वग्रहसंभवात्गोसाध्यकानुमितिरानुपपत्तिरभा

राम०
१९

त्वलौकिकप्रत्यक्ष एवाधिकरणतानवच्छेदकरूपेणानुपस्थिते हेतुत्वादितितुछंव्यभिचारज्ञानाप्रतिबध्यतयालाद
त्राव्यापकताग्रहस्यानुमित्यहेतुत्वात्अन्यथानुत्पत्वयुक्तयाशुद्धगोत्वविधेयकानुमितिप्रतिनिरवच्छिन्नगोत्वविशेष्यक गो
प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावस्यनावोप्रतियोगित्वज्ञानस्यहेतुत्वादयंगौरित्यनुमितेगोत्वत्वाद्यनुपस्थिता
वपिगोत्वरूपधर्मसाधकत्वस्यदुर्वारत्वापत्तेरितिदिक् प्रांचस्तुगोत्वादौमव्यसाध्यादिव्यापकत्वग्रहादेवगोत्वता
दात्म्येनसिद्धिसंभवेनतदनुरोधेनगोत्वतादात्म्येनव्यापकत्वस्वीकारोयुक्तः संबंधगतव्यापकत्वग्रहादेवसंबंधि
नः अनुमितेमिश्रादिसंमतत्वादतउक्तंगोत्वत्वाद्यग्रहदशायामितिगोत्वतादात्म्यहात्ग्रहदशायामित्याकूतंचिंत्या
गौरितिसाध्यप्रतीतिपरत्वान्वयः गोव्यतिरेकादितितादात्म्येनेत्यतुषष्ठ्यतेना एवंचेतिसामानाधिकरण्यादौसंबंधि
त्वप्रवेशोव्यर्थः संयोगत्वेनसंयोगमात्रस्यप्रतियोगितावच्छेदकसंबंधत्वेहत्यनियामकसंबंधस्यापितत्वेसर्वज्ञ
नसिद्धेमतोमात्रपदंसंबंधरूपत्वइति अन्यथातादृशसंबंधावच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्यागगनादेःपृ
थिवीत्वाव्यापकत्वंघटमेवस्यानिदिभावाः तादृशसंबंधस्यप्रतियोगितानवच्छेदकत्वेपिद्वितीयकल्पानुसारेण
व्यापकत्वेसंपादयतिसाध्यतावच्छेदकसंबंधेनेति । तथाचसंबंधांतरावच्छिन्नघगाघभावमादायेवलक्षणसमन्व

38

यद्वृतिभावः द्रव्यत्वस्यागगनासंयुक्तव्यक्त्यंतरे व्यभिचारित्वात् हेत्वंतरमाह पृथिवीत्वादिति। व्यापकत्वमपीति गगनादेरि
ति पूर्वेणान्वयः नन्वेवं निरुक्तव्याप्तिज्ञानात् घटो गगनवानित्यनुमितिः प्रमा स्यादित्यत आह सिद्धेरपीति नचैव वृत्त्य
नियामकसंयोगेनैव तथात्वात्तादृशसंबंधेन गगनेनुमितेः प्रमात्वमिष्टमेवेति भावः तेनासंबंधित्वादिति। येन संबंधेन सा
ध्यसामानाधिकरण्यं परामृश्यते तेनैव साध्यानुमितेः फलत्वादिति भावः सामानाधिकरण्यधियो हेतुत्वस्य त
द्देशे संबंधविशेषानिवेशस्य वा अनंगीकारमतेप्याह अव्यापकत्वाभ्यवेनिनेनेत्यनुपपनेन तथा च यादृशसंबंधे
न साध्यस्य हेतुव्यापकत्वं गृह्यते तेनैव संबंधेन साध्यसिद्धेः फले अतवृत्त्यनियामकसंबंधेन व्यापकत्वासंभवा
देव न तेन साध्यप्रमानुमितिरिति भावः ननु वृत्त्यनियामकसंयोगेनापि गगनस्य पृथिवीत्वादिव्यापकत्वं दुर्वारि
तादृशसंबंधेन गगनसंबंधाप्रसिध्या गगनाभावस्य प्रतियोगिव्यधिकरणत्वाभावात्तादृशाभावापरप्रति
योगित्वस्य च गगनादावसत्वादित्यत आह व्यक्तिशादि इदं वृत्त्यनियामकसंबंधेन गगनादेरव्यापकत्वं तथा च निरु
क्तप्रतियोगिकेत्यादिना वक्ष्यमाणप्रतियोगिवैयधिकरण्यं वृत्त्यनियामकसंबंधेन संयोगाभावेपि रक्षिष्यतीति भा
वः कालिकसंबंधेन गोत्वादौ व्याप्यघटादिकालोपाधिमात्रवृत्तिघटत्वादिहेतौ नाव्याप्तिः नित्यकालिनतेनतद्य

क्लितावच्छिन्नाभावस्यैव घटादौ प्रतियोगिवैयधिकरण्यसंभवादत उक्तं न षड्द्रव्यातिरिक्तेति पृथिव्यादिचतुर्द्रव्येतिरि
क्तेति तु न्यायः गगनादेः कालत्वादिविरहादेव व्युदासादिति ध्येयं कार्यमिकखंडकालस्यापि भिन्नकालिनतावच्छि
द्यावच्छिन्नाभावप्रतियोग्यनधिकरणत्वं प्रसिद्धान्तमात्रवृत्तिस्पंदत्वादिहेतौ नाव्याप्तिरनेन चरमद्रव्यपदं तथाविध
कालत्वादाव्युक्तदितिग्रा नाव्याप्तिरतो मात्रपदं तादृशधर्मस्य महाकालत्वादेः समवायादिनाव्यापकत्वे संयोगाद्यव्या
प्यवृत्तेः स्फुटमसिद्ध्यत उक्तं विशेषणतेति कालिकविशेषणतयेत्यर्थः व्याप्यवृत्तिप्रमेयत्वादेः प्रतियोगिवैयधिकर
ण्यादिघटितमेव कालिकसंबंधावच्छिन्नव्यापकत्वे संभवतीत्यत उक्तं अव्याप्यवृत्तीति तादृशसाध्यं घटादिकं द्रव्यत्वादिकं च
तद्धतोपि कालस्य तदधिकरणत्वात् देशावच्छेदेन कालिकसंबंधावच्छिन्नतदभाववत्त्वान्न त्वेवंविधो वाच्यत्वादिस्तदधी
करणाप्रसिध्या तदवच्छेदककालिकसंबंधावच्छिन्नवाच्यत्वाद्यभावस्य दैशिकविशेषणतया काले अभावादिति
भावः प्रथमलक्षणानुसारेण दोषं संगमयति अवच्छेदकेति प्रतियोगितावच्छेदकसंबंधेनेत्यर्थः। काले। महाकाले
तत्संबंधावच्छिन्नत्वस्य साध्यतावच्छेदकीभूतकालिकसंबंधावच्छिन्नत्वस्य असंभवादित्यभिमानान्वयः द्वितीयविवक्षा
नुसारेणाह तेन संबंधेनेति साध्यतावच्छेदकीभूतकालिकसंबंधेनेत्यर्थः ननु महाकालान्यत्वविशिष्टघटाभावस्य

40

महाकालप्रतियोगिव्यधिकरणः स्खलनः नचात्र विशेषणताविशेष्यत्वादेन महाकालनिरूपितविशेषणतया एव विवक्षि
तत्वात्तादृशसंबंधेन निरुक्तप्रतियोग्यधिकरणप्रसिध्यैवोक्ताभावस्यापि प्रतियोगिवैयधिकरण्यासंभव इति
वाच्यं तथासति कालवृत्तिधर्मस्य तादृशविशेषणतया किमपि व्यापकेन स्यादित्यस्यैव सम्यक्त्वेष्टद्रव्यातिरिक्तेय
भिधानस्य संदर्भविरोधापत्तेः स्वरूपसंबंधेन गगनादेः वृत्तिमत्वद्रूस्याग्रिमग्रंथविरोधाच्च महाकालीयविशे
षणतया गगनादेः वृत्तिमत्वेपि तादृशसंबंधसामान्यमहाकालान्यत्वविशिष्टघटत्वाद्यवच्छिन्नप्रतियोगिताक
त्वविरहाच्चतादृशघटत्वाद्यवच्छिन्नाभावस्यैव निरुक्तः क्रमेणाप्रतिव्यधिकरणत्वसंभवेन पूर्वमतस्यैव सम्य
गितिचेन्न तदानीं महाकालत्वशून्यविशिष्टो घटः कालेऽयं महाकालान्यत्वविशिष्टवानित्यादिप्रतीत्यानमहा
कालस्यापि तत्कालोपाध्यवच्छेदेन महाकालान्यत्वविशिष्टघटवत्वात् अन्यथा उक्तप्रतीत्याखंडकाल एव विशिष्टघट
वत्वावगाहनेवस्कमात्रस्यैव महाकाले असत्वप्रसंगात् इदानीं इहामीमित्यादिप्रतीतिव्याक्तेरिक्तमहाकालाविष
यिण्याः प्रतीतेः स्वरसतः कुत्राप्यसत्वात् नचैवं खंडकालस्याधिकरणत्वे मानाभावः घटध्वंसविशिष्टः कालःऽघ
टवदन्यवृत्ति अन्यादिप्रतीतेः प्रमात्वानुरोधेन खंडकालस्य तथात्वादिति सिद्धान्तानुसारिपंथाः परेतु महान्

सीयवह्नित्वेनवह्निघटेनयत्वेनवाऽवच्छिन्नप्रतियोगिताकस्यधूमसमानाधिकरणाभावस्यऽप्रतियोगिता
वच्छेदकत्वंवह्नित्वेव्यक्तीयव्याप्तिधियाऽवश्यंसाध्यतावच्छेदकोधर्मकोयःसाध्यवदवृत्तिधर्मस्तदनवच्छिन्नेव
हेतुसमानाधिकरणाभावस्यप्रतियोगिताभावलक्षणेनिवेशनीयाप्रसक्तमुनयत्रव्याप्तिसंबंधेनासतोधू
मस्यतादृशासंबंधेनोभयवृत्तिहासंभवेसहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकताव्याप्तिधीकरणमि
न्नत्वनिवेशायोगात् एवंचप्रकृतेमहाकान्यविशिष्टघटत्वाद्यवच्छिन्नाभावस्यप्रतियोगितायाःसाध्यत्ववि
च्छेदकीघटकेनमहाकालान्यत्ववैशिष्ट्यरूपसाध्यनिष्ठधर्मेणावच्छिन्नत्वात्तादृशप्रतियोगिताकाभाव
मादायनप्रतियोग्यव्यधिकरणाभावस्यप्रसिद्धसंभावनापीत्याहुः तच्चिंत्यंप्रमेयवान्वाच्यत्वादित्यादौ
हेतुसमानाधिकरणतादृशप्रतियोगिताकाभावाप्रसिद्ध्याव्याप्तिप्रसंगात्वस्तुतोयादृशप्रतियोगिता
वच्छेदकविशिष्टस्याधिकरणत्वंहेतुमतःतत्रावच्छेदकविशिष्टाभाववत्त्वंसाध्यतावच्छेदकताघटकसंबंध
मात्रेणवाच्यमन्यथातहायःपीडस्यापिकालिकसंबंधेनयद्धूमत्वविशिष्टवन्ह्यादिकंसंयोगेनतदधिकरण
याधूमवान्वह्नेरित्यादौअतिव्याप्त्यापत्तेः इत्थंचयत्रसमवायेनघटत्वविशिष्टस्यकालिकसंबंधेनसाध्यता

त्रि॰जा॰
२२

तत्र महाकालान्यत्वविशिष्टघटत्वावच्छिन्नाभावस्य साध्यतावच्छेदकताघटकसंबंधमात्रेण प्रतियोगिताव-
च्छेदकावच्छिन्नमप्रसिद्धं स्वरूपसमवायाभ्यामेव तत्र तथात्वात् विशिष्टनिरूपितसमवायानभ्युपगमात् तस्मा-
दृशाभावमादाय तत्प्रसिद्धं संभवदिति ध्येयं यत्तु साध्यभेदेन व्योमभिन्नत्वादिविशिष्टसाध्यकस्थल एव यादृशा-
प्रतियोगिताश्रयानधिकरणत्वं हेतुमत इत्येव वक्तव्यं तथा च गुरुघटस्य साध्यतायां महाकालान्यत्वविशिष्ट-
घटस्याभावोपि प्रतियोगिसमानाधिकरण एव प्रतियोगिता च प्रतियोगितावच्छेदकधर्मस्वरूपेव लाघवा-
त्तु प्रतियोगिस्वरूपा तेनाभावानामपि नानात्वेन गौरवात् तेनैकप्रतियोग्यनधिकरणमादाय संयोगित्वेत्वादिसाध्ये
अव्याप्तिरित्याहुस्तच्चिंत्यं कालो घटवान् महाकालत्वादित्यादौ अव्याप्तिवारणार्थमेव विशिष्टसाध्येपि प्रति-
योगितावच्छेदकावच्छिन्नानधिकरणत्वप्रवेशस्य च प्रामाणिकतया गौरवस्याकिंचित्करत्वादिति । सार्वभौमम-
तमाशंक्य निराचष्टे न चेति वाच्यमिति परेणान्वयः तादृशसंबंधेनेति । साध्यतावच्छेदकसंबंधेनेत्यर्थः इदंस्यैच
वृत्तित्वस्य प्रतियोगितान्वितेन तादृशपदस्य प्रतियोगितावच्छेदकसंबंधपरत्वे पुनरग्रे प्रतियोगितासाध्यतावच्छे-
दकसंबंधावच्छिन्ना ग्राह्या तादृशसंबंधेनेत्यर्थः तस्य फलमाह समवायादिति विषयताया इत्यनियामकत्वे सत्यवृत्ति

राम॰
२२

43

44

घटादौ ज्ञानाभावस्य सहजत्वप्रतियोगिवैयधिकरण्यं संभवतीयतः संयोगसामान्यस्य चेति नापि प्रसंग इति ज्ञा
नवान् संयोगवान्वा सत्वादित्यादौ नातिप्रसंग इत्यर्थः सतावद्द्रव्यवृत्तित्वसामान्याभावस्य संयोगादावभावादुक्ताति
व्याप्तिवारणमेव यर्हि। चेत्सदस्यापि प्रयोजनमित्येव ध्येयं प्रतियोगितावच्छेदकविशेष्यस्य फलमाह मूर्तत्वेति
स्पर्शे मनः स्वेडनामूर्तत्वमूर्तत्वोभयसाध्यकमूर्तत्वस्य सद्धेतुतामाशंक्य गुणकर्मान्यत्वादि। विशेषांते द्वयं
मनोगुणयोः क्रमेणान्वितं इदं च विशिष्टस्यानतिरिक्तत्वेपि विशिष्टधर्मावच्छिन्नसाध्यकत्वस्यातिरिक्तत्वमतमनुपे
त्यान्वयाप्रसार्वभौममतेऽनपत्वस्यैक विशिष्टस्यापरत्वरूपत्वेन न च मूर्तत्वोभयगुणकर्मान्यत्वविशिष्टसत्वयोः
संजनितएव मनोगुणाद्यवृत्तितया प्रतियोगितावच्छेदकविशिष्टत्वाभिधानममनगनं स्यादिति ध्येयं। सामान्य
पदस्य सामान्यपदस्य फलमाह संयोगसामान्यं त्वित्ति नथाच संयोगीद्रव्यत्वादित्यादावव्याप्तिवारणार्थमेव सामान्य
पदमिति भावः। विशिष्टस्येति विशिष्टनिष्ठाध्यत्वस्येत्यर्थः तथाच विशिष्टसत्तावान् ज्ञानेरित्यादावतिव्याप्तिरि
तिभावः ननु तादृशसंबंधावच्छिन्नयत्किंचिन्डेयत्वकरूपावृत्तितानवच्छेदकप्रतियोगितावच्छेदकत्वं सामान्यशाने
न विवक्षितं अतो नोक्तदोष इत्यत आह समवायेनेति ननु समवायेन ज्ञाने व्याप्यवृत्तित्वात्साध्यके प्रतियोगिवै

वि॰ज्ञा॰
२३

यधिकरण्यमेवनदेयंचव्याप्यवृत्तिसाध्यकस्थलीयनिरुक्तौसाध्यतावच्छेदकेऽव्याप्यवृत्तितानिरूपकत्वविशेषणमतो
नतत्रलक्षणस्यापिव्याप्तिरतआह संयोगादिनिष्ठत्वविशिष्टनिष्ठाधेयत्वस्यव्यतिरिक्तत्वोपगमेप्रतियोगितावच्छेद
कावच्छिन्नत्वसाध्यतावच्छेदकसंबंधावच्छिन्नत्वोभयाभाववद्व्यधिकरणयत्किंचिद्व्यक्तिवृत्तित्वसामान्यकत्वस्यवि
षान्नोक्तदोषइत्यस्मद्गुरुचरणाः नव्यास्तु साध्यतावच्छेदकसंबंधेनयावद्व्यधिकरणवृत्तिप्रतियोगिकोयोयः
सदन्यत्वंप्रतियोगिवैयधिकरण्यंवाच्यमतोगगनाभावमादायैवप्रसिद्धेः नकोपिदोषः नचैवं यत्संबंधेनयद्धर्मावच्छि
न्नानधिकरणंहेत्वधिकरणंतत्संबंधान्यसाध्यतावच्छेदकसंबंधेनतद्धर्मावच्छिन्नसामानाधिकरण्यमेवलाघवाद्व्या
प्तिरितिवाच्यं घटवृत्तित्वविशिष्टद्रव्यत्ववान्घटत्वादित्यादावव्याप्तेः केनापिसंबंधेन हेतुमत्साध्यतावच्छेदकावच्छिन्नान
धिकरणत्वासंभवादितिप्राहुः तादृशसंबंधसामान्यदृत्यस्यपूर्ववदर्थोबोध्यः क्वचित् साध्यतावच्छेदकसंबंधसामा
न्यदृत्येवपाठः विवक्षितत्वादिति अस्मांतरमूलग्रंथेनेत्यादिः तथाच साध्यतावच्छेदकसंबंधसामान्ययादृशप्रतियोगि
तानवच्छेदकीभूतसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यंव्याप्तिरित्यर्थः संबंधसामान्येरूसवेत्कोकालिकसंबं
धेधूमप्रतियोगिकत्वायः पीडानुयोगिकत्वोभयसत्वाद्धूमवान्वह्नेरित्यादावतिव्याप्तिरतः साध्यतावच्छेदकेतिसमवायि

राम॰
२३

नः संयोगसाध्यतायां जातिमत्वादावतिव्याप्तिः साध्यतावच्छेदकीभूतसमवायात्मकधर्मे समवायत्वावच्छिन्नप्रतियोगि
कत्वगुणानुयोगिकत्वोभयवत्वाद्धूमवान्वह्नेरित्यादौ ~~अतिव्याप्तिरतः साध्यतावच्छेदकेति~~ येन साध्यतावच्छेदका
भावस्य लक्षणाघटकत्वादतः संबंधपदं यद्धर्मावच्छिन्नसंसर्गताकप्रकृतिपर्वतसंयोगे वा हेतुन्महानसानुयोगि
कत्ववह्नित्वावच्छिन्नपर्वतयोगिकत्वोभयाभावसत्वादि साध्यकानुमितिः फलेतद्धर्मावच्छिन्नसामान्यवृत्तिनुपक्लितार्थः
घटसंयोगे वह्निमान्धूमादित्यादौऽव्याप्तिरतः सामान्यपदं तथा च महानसीयवह्निसंयोग एव तादृशोभयाभाव
विरहान्नाव्याप्तिः संयोगसामान्यस्य च हेतुमदयोगोलकानुयोगिकत्वधूमत्वाद्यवच्छिन्नप्रतियोगिकत्वोभयाभा
वसत्वाद्धूमवान्वह्नेरित्यादौ नातिव्याप्तिः संयोगसामान्य एव समवायनिष्ठपर्वतानुयोगिकत्वस्य च वह्नित्वावच्छि
न्नप्रतियोगिकत्वस्य च द्वयोरभावसत्वात्तथैवाव्याप्तिरतः सामान्योभयेति तादृशोभयाभावश्च स्वरूपसंबंधे बोध्यः
तेन समवायादिना तदुभयाभावस्य संबंधमात्रसत्वेऽपि सद्धेतौ नाव्याप्तिः एतद्घटवान् कालांतरीयघटादित्यादौ एतत्
घटत्वावच्छिन्नप्रतियोगिकत्वविशिष्टतद्घटानुयोगिकत्वाप्रसिद्धेरर्थांतरमादायातिव्याप्तिः गगनप्रतियोगिकत्व
विशिष्टमहाकालानुयोगिकत्वाप्रसिद्ध्या गगनाभावमादायाव्याप्तिवारणस्य च असंभवस्यादतो निरूकप्रतियोगि

46

क्तविशिष्टयत्किंचिदधिकरणानुयोगिकत्वसामान्याभावमयस्मायत्तु नयत्सामान्यभावउक्तः नचयादृशप्रति
योगितावच्छेदकावच्छिन्नप्रतियोगिकसंबंधसामान्ये हेत्वधिकरणयत्किंचिदनुयोगि साध्यतावच्छेदकसंबंधत्वस्य
तथाविधसंबंधसामान्यप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वस्य व्यतिरेकः यादृशप्रतियोगितानवच्छे
दकत्वमेव साध्यतावच्छेदकसबस्य वक्तव्यं नोक्तमिति वाच्यं द्रव्यवान्प्रमेयत्वादित्यादौ संयोगेन साध्यतायामपि अ
तिव्याप्त्यापत्तेः प्रमेयानुयोगिकसंयोगसामान्यस्यैव द्रव्यत्वावच्छिन्नप्रतियोगिताकत्वेन साध्याभावस्य लक्षणा
घटकत्वादिति ध्येयं कालिकसंबंधसामान्यमहाकालानुयोगिकत्वेपि गगनप्रतियोगिकत्वविरहाद्गगनादे
रभाव एवं धूमवान्महाकालत्वादित्यादौ प्रतियोगिव्यधिकरणतया प्रसिद्ध इति भावः ननु हेत्वधिकरणीभूत
यत्किंचिद्धिकरणानुयोगिकत्वं यदि तद्व्यक्तिवृत्तित्वेन तदा धूमवान्वह्नेरित्यादावतिव्याप्तिः धूमप्रतियोगिकस्यापि
संयोगस्य कालिकसंबंधेनायोगोलकवृत्तित्वात् यदि च साध्यतावच्छेदकसंबंधस्य संसर्गतानिरूपकोयः संबंधः
तेन हेत्वधिकरणवृत्तित्वमेव तदनुयोगिकत्वं तदा संयोगेन द्रव्यस्य साध्यद्रव्यजात्यन्वेनरत्वादित्यादावतिव्याप्तिः
जातौ समवायेन वृत्त्यप्रसिद्धेः नच साध्यतावच्छेदकसंबंधावच्छिन्नाधिकरणतासामान्यनिरूपकोपयाभावत्वं

विवक्षितं तत्र हेत्वधिकरणावृत्तित्वं स्वरूपसंबंधेनैव वाच्यमिति सांप्रतं अतएवेत्यादिवक्ष्यमाणग्रंथासंगतिप्र
संगात् समवायस्यैकत्वेऽपि तदवच्छिन्नद्रव्यत्वादिधीकरणतायां निरुक्तोभयाभावसत्वेन द्रव्यं जातेरित्यादावतिव्या
प्त्यभावादिति चेन्न संयोगः पर्वतवह्न्योः संबंधो न तेनैव वह्निः पर्वतेनस्येत्यादिप्रतीत्या किंचिदनुयोगिकं किंचित्प्रतियोगि
कं च संबंधस्य समनुभवसिद्धे कुत्रचिदेव संयोगादेर्न तु सर्वत्र तच्च स्वरूपसंबंधविशेषोऽतिरिक्तो वेत्यदन्य
तत् तथा च साध्यतावच्छेदकसंबंधसामान्यनिरूपितप्रतियोगिकसंबंधत्वहेत्वधिकरणीभूतयत्किंचिदनु
योगिकसंबंधत्वोभयाभावस्य विवक्षणान्न धूमसंयोगस्यायोगोलकानुयोगिकसंसर्गत्वविरहादेव नाति
प्रसंगः तत्र यथार्थविशिष्टधीनियामकस्यैतदनुयोगिकसंबंधत्वात् एतेन वह्निमान् वह्निरूपादित्यादावतिव्या
प्तिः पर्वतवह्निसंयोग एव वह्निप्रतियोगिकत्वे हेत्वधिकरणीभूतवह्न्यनुयोगिकत्वोभयाभावविरहाद्वह्निसा
मान्याभावस्य लक्षणाघटकत्वादित्यपास्तं पर्वतवह्निसंयोगस्य हेतुमन्वह्निवृत्तित्वेऽपि वह्न्यनुयोगिकसंबंधा
भावविरहेण तादृशोभयाभावसत्वात् तत्र यथार्थविशिष्टधीनियामकस्यैतदनुयोगिकसंबंधत्वादिदलपदा
तथ्यं यत्र एकसंयोगेन यत्पदार्थयोः परस्परं विशिष्टधीः प्रजाता तत्र तयोरेकस्मिन्न संयोगेन साध्यतदीयरूपादि

48

व्या॰जा॰
२५

त्वादौ व्यभिचारिण्यतिव्याप्तिस्तदुन्यसंयोगस्य निरुक्तोन्याभावविरहादिति। यत्किंचिदित्यस्य फलमाह धूमसं
योगइति अन्यथात्वेऽधिकरणसामान्यानुयोगिकत्वधर्मप्रतियोगिकत्वाभावस्यैव धूमसंयोगसत्वेन धूमा
भावस्य प्रतियोगिव्यधिकरणाभावात् धूमवान्वह्नेरित्यादावतिव्याप्तिरिति भावः। षष्ठ्यंतत्रये विरहादित्य
।त्वपि निरुक्तपदस्य च फलतः फलमाह चैत्रान्यत्वेति निरुक्तपदानुक्तौ चैत्रान्यत्वविशिष्टेन दंडेन दंडवानेत
द्दंडादित्यत्र चैत्रवृत्तेस्तद्दंडहेसंयोगस्य चैत्रान्यत्वविशिष्टैतद्दंडाभावप्रतियोगिप्रतिकत्वयोगित्वे हेत्वधि
करणीभूते चैत्रे योगिकत्वान्योन्याभावविरहात्तत्रादंडाभावस्य लक्षणाघटकतयाऽतिव्याप्तिः स्यात्तदुप
पादनं तु चैत्रान्यत्वविशिष्टैतद्दंडत्वावच्छिन्नप्रतियोगिकस्याभावाद्वैतत्रान्योन्याभावसंभवान्नातिव्याप्ति
रिति भावः। यदि च प्रतियोगितानाप्रसिद्धन्य यथा नैवतद्दचैत्रान्यत्वविशिष्टदंडत्वावच्छिन्नयच्चैत्रावृत्तिदंडनि
ष्ठप्रतियोगित्वेन तदाश्रयप्रतियोगिकत्वहेत्वधिकरणीभूतचैत्रानुयोगिकत्वान्योन्याभावसत्त्वान्निरुक्तपदं वीना
तिनातिव्याप्तिः संभवतीयत्रस्माकमसाधारण्येनातिव्याप्तिरक्षणार्थमुक्तमेवेतदिति। संयोगेन साध्यतायां
निरुक्तपदस्य व्याप्यवृत्तिमुक्ता समवायेन साध्यतायां तमाह गुणकर्मान्यत्वेति। इदं तु समवायस्य नानात्व
मभ्युपेत्य अन्यथा तस्य गुणानुयोगिकत्वविशिष्टसत्वे प्रतियोगिकत्वेनान्यसत्वेनातिव्याप्तिः स्यादवस्थ्यास्यद्यपि

राम॰
२५

यादृशप्रतियोगितावच्छेदकावच्छिन्नेमुक्ताबपि वह्निधूमोभयवान् धूमादित्यत्राव्याप्तिः संयोग एव वह्निधूमो
भयत्वावच्छिन्नप्रतियोगिकपर्वतानुयोगिकत्वोभयाभावस्य तेनैव चानिरूपकप्रतियोगितावच्छेदकावच्छि
न्नवत्वाप्रमायाः सांसर्गिकविषयत्वमेव निरूपकप्रतियोगिकसंबंधांशे च पर्वते तेव वह्निधूमोभयोः प्रसक्तसं
योगस्याप्यसत्त्वीतिनाव्याप्तिः अन्यथा संयोगेन वा वह्निधूमोभयवानितिप्रमायाः दुर्घटत्वापत्तेरितिवा
च्यं तथा सत्यत एव साध्यादीनां वक्ष्यमाणायाः वह्निधूमोभयवान् वन्ह्यादित्याद्यावतिव्याप्तिरगत्यापत्तेः व
ह्निधूमोभयवत्तानियामकसंयोगमात्रस्यैव वह्न्यधिकरणीभूतायोगोलकानुयोगिकत्वाभावेन वह्निधू
मोभयत्वावच्छिन्नाभावमादायातिव्याप्त्यसंभवान्न तथापि साध्यसाधनभेदेन व्याप्तेर्भेदात् व्यासज्यवृ
त्तिधर्मेण साध्यतायां निरुक्तपदमपहाय यादृशप्रतियोगिताश्रयप्रतियोगिकत्वघटितोभयाभावस्य
वे प्रवेशान्नोक्तस्थलाव्याप्तिः न चैवं उभयत्वेन साध्यतायां व्यभिचारिण्यतिव्याप्तिः नद्दोषः स्यात् अत एव यादृ
नाच वह्निधूमोभयवान् वह्नेरित्यादौ ग्रंथकृतैव वक्ष्यमाणत्वादिति वस्तुतस्तु तत्संबंधत्वस्य एकप्रतियोगि
कापदानुयोगिकत्वनियमादेव वह्निधूमोभयत्वावच्छिन्नप्रतियोगिताकसंबंधाप्रसिद्ध्यैव नतुभयत्वा

शि॰ ला॰
२६

वच्छिन्नाभावस्य लक्षणाघटकत्वान्नाव्याप्तिः अत एवात्र वह्निधूमोभयवान् वह्नेरित्यादावतिव्याप्तिरप्रदर्श्यते
नच वह्निधूमोभयत्वानवच्छिन्नप्रकारितादावेव तादृशत्वेन तत्त्वावच्छिन्नप्रतियोगिताकसंबंधस्य प्रसिद्धिसं
भवः प्राच्यांमते प्रकारित्वादेः संबंधितानिविष्टप्रमानियामकस्यैव तत्त्वादिति ध्येयं नचैवमपि घटवन्नि
त्यज्ञानत्वान्न तत्राव्याप्तिः विषयतासंबंधे गगननियत्वानियतज्ञानानुयोगिकत्वान्वयसत्वेन गगनाभावमा
दायाति प्रसिध्यसत्वेवादिति वाच्यं तादृशासंबंधेन घटादेर्व्याप्यवृत्तितया तत्साध्यकेप्रतियोगिवैयधिक
ण्यस्याप्रवेशादिति ध्येयं अत्रेवयं क्रमः साध्यतावच्छेदकसंबंधावच्छिन्नप्रकृतसाध्याधिकरणतानिरूपित
स्वरूपसंबंधेन पादनाप्रतियोगितावच्छेदकावच्छिन्नाधिकरणतासामान्याभाववत्वं हेतुमतस्तादृशाप्रतियो
गितानवच्छेदकत्व विवक्षयैवसामंजस्य निरुक्तप्रतियोगिकत्वत्यादिखंडताः प्रसिद्धिविफलाकालोघटवान्
कालत्वादित्यादौ कालिकसंबंधावच्छिन्नघटाधिकरणतानिरूपितस्वरूपसंबंधावच्छिन्नपटत्वावच्छिन्ना
धिकरणतासामान्यस्येवघटाभावस्य निरुक्तप्रतियोगिव्यधिकरणस्यसत्वाच्चादिति ध्येयं एवं यादृशा
प्रतियोगितावच्छेदकावच्छिन्नानप्रतियोगिकसामान्यसाध्यतावच्छेदकसंबंधत्वहेत्वधिकरणीभूतयत्किंचिदत्तु

राम॰
२६

योगित्वेऽपि घटाभावस्तादृशप्रतियोगिताकत्वान्नेति चिंतनीयं। कालस्य जगदाधारत्वप्रवादमनुसरन्नाह
स्वरूपसंबंधेनेति कालिकविशेषणतयेत्यर्थः तथाचोक्तप्रतीत्यापि प्रतियोगाभावोऽत्र प्रतियोगिव्यधिक
रणाद्भूतिघटवान्महाकाल इत्यादावव्याप्तिः सदवस्थैवेति भावः निरुक्तेऽपीति। प्रतियोगितावच्छेद
कसंबंधेन यादृशप्रतियोगितावच्छेदकावच्छिन्नासंबंधित्वं हेतुमतस्तादृशप्रतियोगितासामान्य इत्यर्थः
तथाच संयोगादिना घटाभावमादायैव घटवान्महाकाल इत्यादावत्र संगतिः घटघटाभावप्रतियोगि
तायाधूमत्वावच्छिन्नत्वेऽप्ययाभावसत्वेन धूमत्वादिनानन्यादिव्यापकत्वतादृशाभावसामान्यमिति तथाच धूम
निष्ठतादृशप्रतियोगितायामेव तद्वृत्तेय सत्वाद्दोषः यत्संबंधेनिकंचित्तादृशसंबंधावच्छिन्नेति दृष्टव्ये
त्राद्यैकस्य अनुपादेयत्वात् तेन धूमवतितत्र संयोगसंबंधेन वह्निसामान्याभावसत्वेऽपि नाव्याप्तिः तत्र संयो
गावच्छिन्नप्रतियोगितायाः संयोगसामान्यानवच्छिन्नत्वात् संयोगस्य स्वतादृशसंबंधतावच्छेदकत्वस्वरूपस्यैव
तथात्वात्। एवं यद्धर्मावच्छिन्ने यत्रापि केचिद्व्याख्याः धर्मावच्छिन्नेति बोध्यं तेन दंडिमान् दंडिसंयोगादित्यादौ तादृ
शप्रतियोगितायाः तत्तद्दंडावच्छेद्यघटसंयोगावच्छेद्यत्वेन यत्वेऽपि नाव्याप्तिः प्रमेयत्वावच्छेद्यघटत्वविशिष्टस्वरूप

52

त्रि॰व्या॰
२७

संबंधावच्छिन्नत्वाप्रसिध्याप्रमेयवान्वाच्यत्वादित्यादौअव्याप्तिरतोविशिष्टाभावमपहायतादृशोभयाभावउक्तः नच
निरूक्तप्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावीययद्धर्मावच्छिन्नप्रतियोगितासामान्येयत्संबंधावच्छिन्नत्वाभावस्त
संबंधेनतद्धर्मावच्छिन्नंव्यापकमित्यस्मत्कधर्मांतरावच्छिन्नाभावाप्रवेशेनलाघवादितिवाच्यं घटवृत्तित्वविशिष्ट
द्रव्यत्ववान्घटत्वादित्यादावव्याप्तिस्तादृशद्रव्यत्वभेदमादायकथंचित्तल्लक्षणासमन्वयेपिदर्शितविशिष्टप्र
मेयवान्स्थूलदधीमत्वादित्यादावव्याप्तेःकेनापिसंबंधेनहेतुमतः साध्यतावच्छेदकावच्छिन्नानधिकरणत्वा
संभवादितिभावः तेनसंबंधेनेतिनचैवंसंयोगेनापिरूपस्यपृथिवीत्वव्यापकत्वापत्तेः तेनसंबंधेनरूपाभा
वप्रतियोग्यधीकरणाप्रसिद्धेरितिवाच्यंतथात्वेपितेनसंबंधेनसाध्यसामानाधिकरण्याप्रसिध्यैवव्याप्ति
लक्षणास्यापिव्याप्तिविरहात्यद्धर्मस्यसाध्यतावच्छेदकसंबंधावच्छिन्नानधिकरणता।निरूपकतावच्छेदक
त्वेनविशेषणीयत्वात् नचवृत्त्यनियामकसंबंधेनसाध्यतायामव्याप्तेस्तस्यापिप्रतियोगितानवच्छेदकत्वपक्षएवे
त्वेनिरूक्तयादस्मात्।निरूक्तप्रतियोगितायाः सामान्येयद्धर्मावच्छिन्नत्वस्वसंबंधातिरिक्तसंबंधानवच्छिन्नत्वोभयाभा
वस्तत्संबंधेनतद्धर्मावच्छिन्नस्यव्यापकत्वमितितुनयुक्तंवृत्त्यनियामकसंबंधेनसाध्यतायांव्यभिचारिण्यतिव्याप्त्याप

राम॰
२७

त्तेः यद्धर्मावच्छेदकताघटकसंबंधेन यादृशप्रतियोगितावच्छेदकतावच्छेदकतावच्छेदकविशिष्टस्यानधिकरणं हेत्वधिकरणं तादृशप्रतियोगितासामान्ये यद्धर्मावच्छिन्नावच्छेदकताकयत्संबंधावच्छिन्नावच्छेदकताकत्वोभेयात्तावत्त्वेन संबंधेन तद्धर्मावच्छिन्नस्य व्यापकत्वं विवक्षितं । वृत्तिनियामकसंबंधस्य प्रतियोगितानवच्छेदकत्वावेऽपि प्रतियोगितावच्छेदकताघटकसंबंधत्वं सर्वसंमतमेव चैत्रो न पचतीत्यादौ वृत्त्यनियामकानुकूलत्वसंबंधेन पाकविशिष्टायाः स्वीकृतेरभावस्य चैत्रादावन्वयदर्शनात् व्यभिचारिणीनुसाध्यत्वसामान्याभावे प्रतियोगितायामेव तादृशोभयाभाववविरहान्नातिव्याप्तिरिति नव्याः ननु व्याप्यवृत्तिसाध्यकस्थले उक्तक्रमेणैव व्यापकत्वं निर्वाच्यमन्यथायं द्विमान्वित्यादौ दंडत्वादिप्रकारेणाव्यापकत्वानुपपत्तेः तथाच प्रमेयवान् घटत्वादित्यादौऽव्याप्तेः प्रमेयत्वावच्छिन्नत्वस्याप्रसिद्धेः नच प्रकारत्वादिनाप्रसिद्धेः प्रतियोगितायाएवावच्छेद्यतायाः प्रकृते निवेशनीयत्वात् अन्यथा प्रकारत्वप्रतियोगित्वसाधारणैकावच्छेद्यत्वविरहेण व्यभिचारिण्यतिव्याप्त्यापत्तेरित्याह समवायेनेति ननु स्वरूपसंबंधेन गगनादेः वृत्तिमत्त्वेऽपि प्रकृतसाध्यतावच्छेदकसंबंधसामान्येन तादृशोभयाभाववविवक्षयैव सर्वसामंजस्ये कृतं विवक्षितांतरेण। घटवान् महाकालत्वादित्यत्र घटीयविशेषणतायां द्रष्ट

त्रि॰ला॰
२८

त्वावच्छिन्नप्रतियोगिताकत्वविरहेणापटाद्यभावस्यैव प्रतियोगिवैय्यधिकरण्यसंभवात् कालः प्रमेयवान् महाका-
लत्वादित्यत्र च प्रतियोगिताकत्वविरहेण घटाद्यभावस्यैव प्रतियोगिवैय्यधिकरण्यकालिकसंबंधेन प्रमेये सामा-
न्यस्याव्याप्यवृत्तितया तत्र प्रतियोगिवैय्यधिकरण्यस्यैवाऽनुपादेयत्वात् निर्दोषत्वात् इतः पूर्वकल्पे दोषांतरमाह अ-
त एवेति यद्यपि संयोगमात्रस्यैव वह्नित्वावच्छिन्नप्रतियोगिकत्वविरहात् वह्निधूमोभयत्वावच्छिन्नप्रतियोगित्वविर-
हात् वह्निधूमोभयत्वावच्छिन्नाभावमादायैव नातिव्याप्तिसंभावेन तथापि वह्निधूमोभयवान् वह्नेरित्यादौ संयोग-
स्य वह्नित्वावच्छिन्नप्रतियोगिकत्वविरहेऽपि समवायस्योभयत्वेऽपि द्रव्यं जातेरित्यादौ नातिव्याप्तिरिति प्रयोजना-
च्चकारस्य प्रमादिक इति प्राच्याः वस्तुतः संयोगमात्रस्य वह्नित्वावच्छिन्नप्रतियोगिताकत्वाप्रसिद्धावपीत्यर्थः तथा च
संयोगमात्रस्यैकप्रतियोगिकापरानुयोगिकत्वस्य लक्षणाघटकत्वेऽपि वह्निधूमोभयवान् वह्नेरित्यादौ नातिव्याप्तिः प्र-
कारत्वादेः संसर्गविमानाभावादित्तितु प्रागेव प्रपंचितमस्माभिः केचित्तु वह्निरित्यत्र धूमादित्तिनातिव्याप्तिरित्युनंतरं
न्वाव्याप्तिर्वेतिपाठं कल्पयंतो द्रव्यं जातेरित्यादावतिव्याप्तिर्वह्निधूमोभयवान् धूमादित्यत्र अव्याप्तिरेव पूर्वलक्षणे
दोषं संगमयंति तन्न स्वरूपसंबंधात्मकप्रतियोगित्वस्य विशिष्टधीजनकत्वरूपसंबंधताघटकनियमघटिता- राम॰
२८
४ संबंधनिष्ठत्वनियमेन वह्निधूमोभयत्वावच्छिन्नप्रतियोगिकसंबंधत्वस्याप्रसिद्ध्यात तादृशाप्रतियोगिक ४

55

दन्योन्याश्रयत्वमत आह प्रतियोगित्वादीति आदिना अवच्छेदकत्वादिपरिग्रहः न संबंधत्वेनेति प्रतियोगित्वा
दिधर्मांतरप्रकारेण हेतुमन्निष्ठाभावीयत्वप्रकारेणैव वा तत्त्ववेशादिति भावः संयोगत्वादिनेवेति संबंध
विधेयत्वादिना तु प्रतियोगितात्वमपि स्वरूपसंबंध एवोक्तदोषतादवस्थ्यं किंच हेत्वनियामकसंबंधेन हेतु
ता स्थले हेतुसंबंधित्वावश्यनिवेशनीयत्वाविरहतः संबंधत्वेन निवेशेऽपि न क्षतिरित्याशंक्याह दर्शितं चेति
विशेष्यत्वविशेषणतान्यविशिष्टधीविषयत्वस्यैव संबंधतास्वरूपत्वादिति भावः भावसामान्ये भिन्नत्व
पस्याभावत्वस्य प्रवेशे घटत्वाभाववान् द्रव्यत्वादित्यत्राव्याप्तिरत आह अभावत्वं चेति इदमिहेत्यादि इदं द्रव्ये।
न्यान्याभावत्वात्यंताभावत्वयोरभावत्वगर्भतामभिप्रेत्य तयोस्तदगर्भतायां त्वाह तदपीति अभावत्वमपीत्य
र्थः अतिरिक्तविषयतापक्षस्य नैयायिकेन क्वचित्स्वीकारात् तस्य दृष्टांतेन नानात्वादिविषयतात्वादिहार्थः के
चित्तु तत्त्वादिना इदंत्वादिपरिग्रहः तत्त्वेन तयोः पदार्थांतरत्वं विना दुर्वचत्वात्तत्रैव पर्यवसानादित्याहुः तत्त्वे
ति प्रतियोगिनात्वाधिकरणतावेत्यर्थः॥ इति प्रतियोगिव्यधिकरणलक्षणटिप्पणी॥ श्रीराम॥ ॥अथावच्छेद
कटिप्पणी॥ अनवच्छेदकमित्यत्र अवच्छेदकत्वमवच्छेदकत्वपदार्थः। विशिष्टसत्तायसमनीयतस्य सत्तात्वस्य

56

```
[OrderDescription]
,CREATED=16.10.20 11:57
,TRANSFERRED=2020/10/16 at 12:05:03
,PAGES=56
,TYPE=STD
,NAME=S0004040
,Book Name=M-825-PRATIYOGITA VYADHIKARAN LAKSHAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
```

```
FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
```

```
FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,
```